Bhattanilkantha
Bhagawant bhaskar
भगवंत भास्कर
Sanskrit
Paper - printed
1959 Sambat (117 years old)
24 Folios
12.5"x5.4"
Complete

श्रीगणेशायनमः ॥ महोमहत्समाराध्यजलोत्सर्गमथोक्तवान् ॥ प्रतिष्ठांसर्वदेवानांनीलकंठोवदत्यसौ ॥ १ ॥ जज्ञेपितामहतनोःखलुकश्यपो
यस्तस्माद्जायतमुनिस्तुविभांडकाख्यः ॥ तंपुत्रिणांधुरमरोपयदृष्यशृंगस्तस्यान्वयेप्यजनिशृंगिवराभिधानः ॥ २ ॥ तस्मिन्वंशेमहति
विततेसेंगराख्येनृपाणांराजाकर्णःसमजनियथासागरेशीतरश्मिः ॥ कीर्त्यायस्यप्रथिततरयाश्रोत्रजातेभिपूर्णेकर्णस्यापिप्रविततकथानावका
शंलभंते ॥ ३ ॥ विशोकाख्यदेवस्ततस्तत्सुतोभूद्विशोकीकृतायेनसर्वाधरित्री ॥ ततोप्यासराजास्तशत्रुस्ततोभूद्दयाख्योरयेणैवसर्वाहित
घ्नः ॥ ४ ॥ वभूवाथवैराटराजस्ततोभून्नपोमेदिनीवल्लभोवीढराजः ॥ ततोब्रह्मदेवस्ततोमन्युदेवस्ततोभून्नृपश्चन्द्रपालाभिधानः ॥५ ॥ शिवगणा
ख्यनृपःसमजन्यथोशिवगणाख्यपुरंप्रचकारयः ॥ शिवगुणेनसमःसकलैर्गुणैःशिवशिवप्रथमोगणनासुयः ॥ ६ ॥ शोलिचंद्रइतितत्तनयो
भूत्कर्मसेननृपतिस्तमथानु ॥ लोकपोनरहरिर्नृपराजोरामचंद्रइतितत्तनुजातः ॥ ७ ॥ यशोदेवस्ततोजातस्ताराचंद्रनृपस्ततः ॥ चक्रसे
नस्ततोराजाराजसिंहनृपोयतः ॥ ८ ॥ ततोप्यभूद्भूपतिसाहिदेवःस्वकीर्तिभिर्निर्जितदुग्धसिंधुः ॥ अभूत्ततःश्रीभगवंतदेवःसदैवभाग्योद
यवान्क्षितीशः ॥ ९ ॥ यद्दानद्रविणादिनिर्जितवपूरत्नाचलोलज्जयादूरेस्तब्धइलावृतेनिविशतेनोयत्रपुंसांगतिः ॥ किंचत्रस्यदरातिवा
मनयनानेत्रांबुभिर्वर्धितस्तेजोग्निर्वडवामुखोत्थहुतभुक्तुल्यःकथंनोभवेत् ॥ १० ॥ आज्ञप्तस्तेनराज्ञाविबुधकुलमणिर्दाक्षिणात्यावतंसोभट्ट
श्रीनीलकंठःस्मृतिषुदृढमतिर्जैमिनीयेऽद्वितीयः ॥ आज्ञामादायमूर्ध्नासविनयममुनातस्यसर्वान्निबंधान्दृष्ट्वासम्यग्विविच्यप्रविततकिरणस्तन्यते
भास्करोयम् ॥ ११ ॥ प्रतारकैराहतमत्रकिंचिन्नक्षयातुनिर्मूलतयातदुज्झितम् ॥ ऊनोक्तितातोनहितेनकाचिद्बुपुण्यहीनापचितिर्नहीं
यते ॥ १२ ॥ संस्काराचारकालाःसमुचितरचनाःश्राद्धनीतीविवादोदानोत्सर्गप्रतिष्ठाजगतिजयकराःसंगतार्थानुबद्धाः ॥ प्रायश्चित्तंवि

शुद्धिस्तदनुनिगदिताशांतिरेवंक्रमेणख्याताग्रंथेत्रशुद्धेबुधजनसुखदाद्वादशैतेमयूखाः ॥ १३ ॥ भगवंतभास्कराख्येग्रंथेस्मिन्निच्छप्रसंमतेच
ततः ॥ प्रातिष्ठविधिमयूखःप्रतन्यतेनीलकंठेन ॥ १४ ॥ तंत्रतत्कालाविष्णुधर्मोत्तरे ॥ चैत्रेवाफाल्गुनेवापिज्येष्ठेवामाधवे
तथा ॥ माघेवासर्वदेवानांप्रतिष्ठाशुभदासिते ॥ रिक्तान्यतिथिषुस्यात्सावारेभौमान्यकेतथा ॥ इतितत्रैव । आषाढेद्वेतथामूल
मुत्तरात्रयमेवच ॥ ज्येष्ठाश्रवणरोहिण्यःपूर्वाभाद्रपदातथा ॥ हस्ताश्विनीरेवतीचपुष्योमृगशिरास्तथा ॥ अनुराधातथास्वातीप्र
तिष्ठासुप्रशस्यते ॥ इति । अत्राषाढेद्वेइत्यनेनैवोत्तराषाढाप्राप्तावप्युत्तरात्रयपदमुत्तराफाल्गुन्युत्तराभाद्रपदयोरर्थवत् । नारसिंहे । तथाम
हाश्विनोमासउत्तमःसर्वकामदः ॥ देवीतत्रसदाशक्रपांसुनापिप्रतिष्ठिता ॥ भवनेफलदापुंसांकर्कस्थेचवृषस्थिते ॥ नतिथिर्नचनक्षत्रंनोपवासो
त्रकारणम् ॥ मातृभैरववाराहनारसिंहत्रिविक्रमाः ॥ महिषासुरहंत्र्यश्चस्थाप्यावैदक्षिणायने ॥ क्वचिन्निषेधः ॥ आर्द्रादिकेस्वातिविरा
मकालेनक्षत्रवृंदेदशकेस्थितेऽर्कें ॥ विवाहचौलव्रतबंधदीक्षासुरप्रतिष्ठादिनकार्यमेवेति ॥ अथसंभाराः ॥ अर्कादिग्रहसमिधांप्रत्येकम
ष्टशतंसंक्षेपपक्षेआज्यचर्वादिलोकपालादियागायपलाशादिसमिधां प्रत्येकमष्टसहस्रमष्टशतं वा पुष्पमालाः कुंकुमं कर्पूरः कस्तूरी

१ मावृषिस्थापितंलिंगंभवेद्वरदयोगदमितिनिर्णयसिंधौ । श्रेष्ठोत्तरेमतिष्ठास्यादयनेभुक्तिर्मीहताम्। दक्षिणेतुमुमुक्षूणांमलमासेनसाद्वयोरिति शैवसिद्धांतशेखरेचोक्तेः आर्द्रांमवेशात्पूर्वमापा-
ढेपिभवति । मुक्तिकामनांतुदक्षिणायनेपिभवति ।

२ पंचमीचद्वितीयाचतृतीयासप्तमीतथा । दशमीपूर्णमासीचतथाश्रेष्ठात्रयोदशी । आसुमतिष्ठाविधिवत्कृताबहुफलाभवेत् । बुधोवृहस्पतिः शुक्रस्त्रयोप्येतेशुभग्रहाः । एभिर्निरीक्षि
तंलग्नंनक्षत्रंचमशस्यते । शुभेलग्नेशुभस्थानेशूभेक्रूरविवर्जिते । लग्नेऋक्षेप्रकुर्वीतमतिष्ठाविधिमुत्तमम् । अयनेविषुवेतद्वत्पडशीतिमुखेतथा । एतेषुस्थापनंकार्यंविधिदृष्टेनकर्मणा । प्राजापत्ये
पुशयनंश्वेतेषुस्थापनंतथा । मुहूर्तेस्थापनंकुर्य्यात्पुनर्ब्राह्मेविचक्षणः । इति राजकौस्तुभे ।

चंदनं गुग्गुलुधूपः दहनं आरार्तिकं घंटा पादुकादर्पणं बलिसामग्रीपायसभक्ष्यभोज्यनैवेद्यं होमार्थमाज्यतिलयवाक्षतफलादिकंप्रति कुंडंविष्टराश्चत्वारः प्रतिकंडंस्रुक्स्रुवौ आसनानि त्रिसूत्री श्वेतोर्णासूत्रंसर्वतोभद्रादिरचनायै श्वेतरक्तपीतनीलकृष्णवर्णकाः स्नपनकलशाः पंचपल्लवाः कदलीस्तंभाः पताकादश ध्वजाश्चदशतेषां वेणुदंडाः वज्रमौक्तिकवैडूर्यशंखस्फटिकपुष्परागेंद्रनीलमहानीला इति रत्नाष्टकं हरितालमनःशिलाभ्रकृष्णजिनमाक्षिकसीसस्वर्णमाक्षिकगैरिका इत्युपधात्वष्टकं तिलयवमुद्गगोधूमनीवारश्यामाकसर्षपव्रीहय इतिबीजाष्टकं सुवर्णरजतताम्रलोहत्रपुसीसरंगरीत्याख्यधात्वष्टकं मधुपर्कपात्रंसौवर्णवाताम्रंवाअर्घपात्रं शक्त्यैकद्वित्रिमाषसुवर्णशलाकास्थापनीयकलशरत्नानि षोडशद्वारकलशाः अष्टौलोकपालकलशाः वेदिकलशाश्चत्वारः वास्तुमंडलकलशाः कुंडकलशाः कुंडसंख्ययानिद्राकलशाः स्नपनकलशाः पंचचत्वारिंशत्कलशसंख्ययाशरावाणि धारासहस्रान्वितौकलशौ गजाश्वस्थानवल्मीकसंगमनदीकूलद्वयवराहोत्खातराजद्वारमृदः मुरामांसीवचाकुष्ठशैलेयहरिद्रादारुहरिद्रासटीचंपकमुस्ता इति दशसर्वौषध्यः पंचगव्यंपृथक्पृथक् व्रीहितिलयवगोधूमनीवारश्यामाकमुद्गा इतिसप्तधान्यानि प्रतिमार्थंशय्यासोपस्कराश्वेतवस्त्रंचामरंविचित्रवितानंत्रयोदुकूलपट्टाःऋत्विग्वरणसामग्रीशिल्पिवस्त्रयुगमित्यादिसंपादितसंभारोमूर्तिप्रतिष्ठादिनात्प्राक्सतमादिनेपंचमादिनेतृ०दिनेद्वि० दिनेसद्योवाप्रासादाग्रेउत्तरेपूर्वेवाषोडशद्वादशदशहस्तंवामंडपंकृत्वातन्मध्येचतुरस्रांसप्तहस्तांपंचहस्तांचतुर्हस्तांवाहस्तोच्छ्रितां वेदिं मंडपोत्तरेतदर्द्धेनतृतीयभागेनचतुर्थेनवाभागेनचतुर्द्वारंस्नानमंडपं तत्रवेदिकात्रयंचकृत्वाशिल्पिस्थानात्प्रासादप्रादक्षिण्येनदेवंतत्रानीयासनेनिधायाचांतःप्राणानायम्यमासाद्युल्लिख्यास्यांमूर्तौलिंगेवादेवक

१ मुक्तामाणिक्यवैडूर्यगोमेदावज्रविद्रुमौ ॥ पुष्परागंमरकतंनीलंचेतियथाक्रमात् ।

लासान्निध्यार्थमायुः श्रीसर्वफलाक्षय्यसुखकामईश्वरप्रीतिकामोवामुकमूर्तैर्लिङ्गस्यवाप्रतिष्ठांकरिष्ये इतिसंकल्प्यगणपतिपूजनंपुण्याहवा
चनंकृत्वा–प्रतिमायागसिद्ध्यर्थंश्राद्धमेतत्सुदुर्लभम् ॥ यजनायात्मनःशक्त्यंकरिष्येमातृपूर्वकम् ॥ इतिमंत्रमुक्त्वामातृपूजनंनांदीश्राद्धं
चकृत्वाऽऽचार्यंवृत्वाद्वात्रिंशत्षोडशाष्टौचतुरोवाऋत्विजोऽष्टौचतुरोवाद्वारपालान्वृत्वातान्संपूजयेन्मधुपर्कादिना ॥ सदस्यवरणमप्यत्रेतित्रिवि
क्रमादयः । ततः–मंत्रमूर्तिर्भवान्नाथसंसारोच्छेदकारकः । देवःपूजार्होयथास्यात्कुरुधर्मोद्धर्तिंचनः ॥ संसारभयभीतेनह्ययंयज्ञःसुभक्तितः ॥
प्रारब्धस्त्वत्प्रसादेननिर्विघ्नंमेभवत्विहइत्याचार्यंसंप्रार्थ्य सतूर्यघोषंसपरिकरःसंपूर्णकुंभोभद्रंकर्णेभिरितिमंत्रेणमहामंडपंप्रदक्षिणीकृत्यपश्चिमद्वा
रेणप्रविशेत् ॥ तत्राचार्यः–अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशम् ॥ सर्वेषामविरोधेनब्रह्मकर्मसमारभे–इत्युक्त्वातत्रसर्षपान्विकीर्य–
देवाआयांतु यातुधानाअपयांतु विष्णोदेवयजनंरक्षस्वेतिरक्षांकृत्वा वेदिकाग्नेयकोणेस्थूणां वसुदायैनमःवसुदामावाहयामीत्यालभ्यगंधपुष्पा
दिनार्चयेत् । ततःप्रादक्षिण्येनभद्रायैनमइतिद्वितीयां अदित्यैनमइतितृतीयां नंदायैनमइतिचतुर्थीम्–मंडपाग्नेयकोणेभूत्यै०इतिप्रथ
माम्॥ततःप्रादक्षिण्येनसरस्वत्यै०पूर्वसंध्यायै०मध्यसंध्यायै०पश्चिमसंध्यायै०गायत्र्यै०सावित्र्यै० बृहस्पत्यै०अदित्यै०वितताये०पौर्णमास्यै०
सिनीवाल्यै० १६ इतिषोडशस्थूणाःस्पृष्ट्वापूजयेत् ॥ नागमात्रेनमइतिबलिःकार्यः ॥ सर्पेभ्योनमइतिशाखोद्बंधनानिपूजयेत् । ततः
पश्चिमद्वारेणनिर्गत्यपूर्वदिगादिद्वारतोरणपूजामारभेत् ॥ तत्रप्राच्यांसुदृढतोरणाय०आश्वत्थतोरणेनैनंयज्ञंरक्षसर्वविघ्नान्निवारयेतिपूज
येत् ॥ अथत्रिशूलशृंगेषुप्रादक्षिण्येनेंद्रंधातारंभगमित्यादित्यन्यासंकुर्यात् ॥ द्वारशाखयोर्ध्रुवमध्वरंचेतिवसुद्वयमर्चयेत् ॥ शाखा

मूलस्थयोर्धान्यराश्योरुपरिरत्नगर्भौप्रशांतशिशिरनामानौकलशौप्रतिष्ठाप्यपूजयेत् ॥ ततोद्वारदेशेइन्द्रमावाह्यसंपूज्यनमस्कृत्यइंद्रायाहिचित्रभानोइतिपीतांपताकांध्वजंचालभ्यत्रातारमिंद्रमितितांतोरणोपरिनिदध्यात् । इद्रंवइतिइंद्रायघृतौदनबलिदानम् । अग्निमीळइत्यृग्वेदंपूजयेत् ॥ ऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदैवतः ॥ अत्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिध्यानम् ॥ तत्र श्रीसूक्तंपावमानंचसोमसूक्तंसुमंगलम् ॥ पौरुषंरुद्रसूक्तंचवामदेव्यंतथैवचेतिद्वारपालजपः ॥ अथाग्नेयकोणे अग्नयेनमइत्यग्निमावाह्यपूजयेत् ॥ अग्नआयाहीतिरक्तध्वजपताकालंभः ॥ त्वन्नोअग्नइतिपताकोच्छ्रायः ॥ अग्निंदूतमितिघृतौदनबलिः ॥ याम्येसुभद्रतोरणायनमः औदुंबरतोरणैनंयज्ञंरक्षसर्वंविघ्नान्निवारयेतिपूजयेत् ॥ शृंगेषुपूष्णेनमः मित्रायनमःवरुणायनमइत्यादित्यन्यासः ॥ द्वारशाखयोःसोमाय०आपायनमइतिवसुद्वयमर्चयेत् । शाखामूलयोःपर्जन्याशोकनामानौकुंभौप्रतिष्ठाप्यपूजयेत् ॥ ततोद्वारदेशेकलशेयममावाह्यनमस्कृत्ययमायसोमामितिश्यामध्वजपताकालंभः॥यमायमधुमत्तममितितोरणोपरिनिधानम्॥ यमायसोमामितिमाषभक्तबलिदानम्।इषेत्वेतियजुर्वेदंपूजयेत् ॥ कातराक्षोयजुर्वेदस्त्रैष्टुभोविष्णुदैवतः ॥ काश्यपेयस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतियजुर्वेदध्यानम् ॥ तत्र—आनोभद्रानुवाकश्वआशुःशिशानकस्तथा ॥ यद्देवास्त्रीणिचपठेत्ततोधौचपुनंतुमाम् ॥ अभिधाअसिसत्सैवदीर्घायुस्तेऋचंपठेत् ॥ आप्यायस्ववषणमोस्तुसर्पेभ्यश्च आकृष्णेन ॥ नमःशंभवेइत्येकांएकाग्निर्दैवताक्रमात् ॥ त्रातारमिंद्रमित्येकांसोमंराजानमेकया ॥ अन्नपतेमहाँ इंद्रऋचंवाचंसमग्रकंपठेत् ॥ अथनिर्ऋतौ कलशेनिर्ऋतयेनमइतिनिर्ऋतिमावाह्यपूजयेत् ॥ मोषुणःपरापरेतिकृष्णध्वजपताकालंभः ॥ असु

१ कलशे । २ बलिदानांतेसर्वत्रश्रौत्राचमनम् । ३ कलशे ।

न्वंतामितिध्वजपताकोच्छ्रयणम् । निर्ऋतिंसंपूज्यमोषुणइतिकृष्णव्रीह्यन्नंघृतसहितंबलिंदद्यात् । अथपश्चिमायां सुभीमतोरणायनमः प्लाक्षतोरणैनंयज्ञंरक्षसर्वविघ्नान्निवारयेतिपूजयेत् ॥ अथत्रिशूलशृंगेषु—अर्यम्णेनमः अंशवेनमः विवस्वतेनमःइत्यादित्यन्यासः ॥ द्वारशाखयोः अनिलायनमःअनलायनमइतिवसुद्वयमर्चयेत् शाखामूलयोर्धान्यपुंजयोःसंजीवनामृतनामानौकुंभौप्रतिष्ठाप्यपूजयेत् । तत्रवरुणमावाह्यनमस्कृत्यतत्त्वायामीतिश्वेतध्वजपताकालंभः ॥ उदुत्तमंवरुणेतितोरणोपरिनिधानम् ॥ नवनीतौदनबलिदानम् । अग्नआयाहीतिसामवेदंपूजयेत् । सामवेदस्तुपिंगाक्षोजागतःशक्रदैवतः ॥ भारद्वाजस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेति सामवेदध्यानम् ॥ तत्रजपः—इन्द्रायसामगायत अहमास्मिप्रथमजाऋतस्य०स्वादिष्ठया० गायंतित्वागाय० कस्यनूनंकतमस्यामृतानामित्यादि । अथवायव्ये वायवेनमइतिवायुमावाह्यपूजयेत् ॥ वायोशतमितिधूम्रध्वजपताकालंभः॥ तववायवृतस्पतइतिपताकोच्छ्रयणम् ॥ वायुंसंपूज्ययवौदनबलिदानम्॥ अथोत्तरे सुप्रभतोरणाय नमःन्यग्रोधतोरणैनंयज्ञंरक्षसर्वविघ्नान्निवारयेतिपूजयेत् ॥ त्रिशूलशृंगेषुत्वष्ट्रेनमःसवित्रे० विष्णवेनमःइत्यादित्यन्यासः । द्वारशाखयोःप्रत्यूषायनमः प्रभासायनमः इतिवसुद्वयमर्चयेत् । शाखामूलस्थयोर्धान्यराश्योर्धनदश्रीप्रदनामानौकुंभौप्रतिष्ठाप्यपूजयेत् । अत्रसोममावाह्यनमस्कृत्यसोमोधेनुमितिसुवर्णवर्णध्वजपताकालंभः । वयंसोमेतितोरणोपरिनिधानं॥आप्यायस्वेतिप्रैयंगवबलिदानम् । शन्नोदेवीरित्यथर्ववेदंपूजयेत् । सुवर्णनयनोथर्वानुष्टुप्छंदःपुरंदरः ॥ वेदोवैतानगोत्रस्तुऋत्विक्त्वंमेमखेभवेतितद्ध्यानम् । तत्र अथर्वांगिरसंचैवअथर्वशिरसंतथा—शांत्यध्यायंचपठेत् ॥ अथैशान्यां ईशानायनमइतीशानमावाह्यपूजयेत् । नमःशंभवायेतिरक्तध्वजपताकालंभः । तमी ॥ ३ ॥

१ द्वारदेशे कलशे । २ तत्त्वायामीति । ३ कलशे । ४ आनोनियुद्भिरिति । ५ द्वारदेशेकलशे । ६ कलशे ।

शानमित्युच्छ्रयः । कद्रुद्रायेतिगवेधुकबलिः। ईशानपूर्वयोर्मध्येकलशेअनंतायनमः इत्यनंतमावाह्यपूजयेत् ॥ नमोस्तुसर्पेभ्यइतिमेघवर्णध्व
जपताकालंभः । तद्विष्णोरित्युच्छ्रयः । विष्णोर्नुकमितिबलिदानम् । पश्चिमनिर्ऋतिमध्येकलशेब्रह्मणेनमइत्यावाह्यपूजयेत् । यद्देवादेवहेड
नमितिरक्तध्वजपताकालंभ ः ॥ ब्रह्मजज्ञानमित्युच्छ्रयः । सनोभुवनस्यपतइतिपायसबलिदानम् । प्राच्यांगणानांत्वेतिगणेशंसंपूज्य नमो
स्तुरुद्रेभ्योयेपृथिव्यांयेंतरिक्षइतिमंडपाद्बहिर्दिग्विदिक्षुरुद्रान्संस्थाप्यतेभ्योबलिंदद्यात् । येकेचित्विहलोकेषुआगताबलिकांक्षिणः ।
तेभ्योबलिंप्रयच्छामिनमस्कृत्यपुनःपुनः—इतीशान्यांसर्वेभ्योभूतेभ्योनमइतिबलिंदत्त्वाऽऽचामेत् ॥ इतिमंडपपूजा ॥ अथगुरुर्महावेद्यांसर्व
तोभद्रदेवतादानमयूखोक्तसामान्यप्रयोगोक्ता आवाह्यसंपूज्यस्वकुंडेऽग्निंस्थापयेत् ॥ ततःसर्वेपिहोतारस्तमेवाग्निंस्वस्वकुंडेप्रणयेयुः । ततोगुरुः
प्रासादांतरेशान्यां नैर्ऋत्यांवाहस्तमितवेद्यांचतुःषष्टिपदेवास्तुपीठसामान्यप्रयोगोक्ताः शिख्यादिदेवताआवाह्यसम्पूज्य[1]ताभ्योबलिं दत्त्वाकुं
डेषुस्वस्वशाखीयपूर्वांगोत्तरंहोतारः प्रतिदेवतमष्टोत्तरशतमष्टाविंशतिमष्टौवाप्रत्येकंसमित्तिलाज्यैः कुंडसंख्ययाविभज्यजुहुयुर्नाममंत्रैः ॥
ततःवास्तोष्पतेप्रतिजानीहीति मंत्रचतुष्टयेनसमित्तिलाज्यैः प्रतिद्रव्यमष्टोत्तरशतंपूर्ववद्धुत्वा ततःपंचसंख्ययापंचविंशतिसंख्ययावाविल्वै
स्तद्बीजैर्वावास्तोष्पतइति चतसृभिर्वास्तोष्पतेध्रुवास्थूणामितिचहुत्वा अघोरेभ्योऽथघोरेभ्यइत्याज्येनाष्टोत्तरसहस्रमष्टोत्तरशतंवावास्तुमर्मसं
धानायजुहुयुः । ततोरक्षोघ्नपावमानसूक्ताभ्यांत्रिसूत्र्याप्रासादंसंवेष्टचपरितोजलदुग्धयोः पृथगविच्छिन्नेधारेदत्त्वापीठेपूजितां हैमींवास्तुप्र
तिमांदधिदूर्वासप्तधान्यशैवालगंधाक्षतपुष्पयुतेऽपक्वमृद्भांडेसंस्थाप्यतत्पिधायचतुःषष्टिधाभाजितप्रासादाग्नेयकोणपदादुत्तरेआकाशपदे जा

१ इशान्यांकलशंसंस्थाप्यतदुपरि । २ उदुंबरसमितं ।

नुमात्रंगर्तंकृत्वाजलेनापूर्यगंधपुष्पाणिप्रक्षिप्यभूद्भांडं तत्र निधायगर्तंतन्मृदैवपूरयेत् । मृदआधिक्येपरंशुभम् । इत्थंवास्तुपूजांकृत्वा गुरुर्मंडपेशानभागे वेद्यांग्रहानधिदेवताः प्रत्यधिदेवता विनायकादीन्पंचलोकपालांश्च दानमयूखोक्तप्रकारेणावाह्यपूजयेत् । ततः ऋत्विजः समिच्चर्वाज्यैः अष्टोत्तरसहस्राष्टोत्तरशताष्टाविंशत्यष्टान्यतमसंख्यया कुंडेषु विभज्यहुत्वाविश्वकर्ममंत्रित्याज्येन हुत्वा बलीन्दत्त्वापूर्णाहुतिंजुहुयुः ॥ एतन्मन्त्रप्रकारादिकंदानमयूखेसामान्यप्रयोगेउक्तम् ॥ अथ गुरुःस्नानमण्डपे ॐ नमो नारायणायेत्यभिमंत्रितेन पंचगव्येनभूमिंवेदिकात्रयंचसंप्रोक्ष्यतत्रदक्षिणवेदिकायामास्तृतवालुकायामक्षतैः स्वस्तिकंलिखित्वा तत्रविश्वकर्मणोवाध्यानम् ॥ विश्वकर्मातुकर्तव्यःश्मश्रुलोमांसलाधरः ॥ संदंशपाणिर्द्विभुजस्तेजोमूर्तिःप्रतापवान्—इतिध्यात्वासप्तधान्योपरिभद्रपीठंनिधायवेदिकायाः पश्चाद्वारिपूर्णान्सपल्लवान्षट्कलशान्मृत्पल्लववार्क्षकषायगोमूत्रगोमयभस्मगंधोदकैःप्रपूर्यापरान्पंचगंधजलेनापूर्योदक्संस्थपंक्तिरूपेणासादयेत् ॥ तत्रांत्यः । स्थपतिकलशः। भद्रपीठयुतमध्यमवेदिपाश्चिमेप्येवंस्थपतिकलशातिरिक्ताएकादश। भद्रपीठयुतोत्तरवेद्यास्तुपरितोष्टौकलशान्पूर्वादिक्रमेणक्षारोदकक्षीरदधिसर्पिरिक्षुरससुरास्वादूदकगन्धोदकयुतान् हिरण्यगर्भाद्यैरष्टभिर्मंत्रैर्विन्यसेत् ॥ ततोन्येद्युर्वेद्याःपश्चिमभागे मृत्तिका—गोमय-गोमूत्र—भस्म-मिलितपंचगव्य—क्षीरदधि-घृत—मधु—शर्करायुताःदशकलशाः, पंचदशशुद्धजलकलशाः।अथान्यानेकत्रिंशत्कलशानासादयेत्॥तत्रद्वयोःशुद्धजलंएकस्मिन्पंचामृतं पंचसुजलंएकस्मिन्सुगंधिजलं एकस्मिन्पंचपल्लवकषायः

टि०१—१ हिरण्यगर्भःसम० २ यःप्राणतोनि० ३ ब्रह्मजज्ञानं० ४ सबुध्निया० ५ महीद्यौःपृ० ६ उपश्वसवपृथि० ७ अग्नेनय सुपथा ८ यातेअग्ने० । २ अष्टपलमिता । ३ मुष्टिपरिमितम् ।

वौंषधिजलेन नमोस्तुसर्वेभ्यइतिपंचपल्लवोदकेन अष्टौव्यख्यत्ककुभःपृथिव्याइतिरत्नोदकेन इमंमेगंगेइतितीर्थोदकेन पुनरष्ट भिःकलशैःपूर्वकल्पितैःसमुद्रसंज्ञितैःस्नापयेत् । कयानश्चित्रइतिक्षारोदकेन । आप्यायस्वसमेत्वितिक्षीरकुंभेन दधिक्राव्णइतिदध्नः घृतवती भुवनानामितिघृतस्य पयःपृथिव्यामितीक्षुरसस्य देवंबर्हिरितिसुरोदकस्थ स्वादिष्ठयेतिस्वादूदकस्य सरस्वतीयोन्यामितिगर्भोदकस्य कल शैः पुनर्दशभिःपल्लवैर्लोकपालकलशैःस्नापयेत् । तत्रत्रातारमिंद्रमितिकदंबपल्लवकुंभोदकेन त्वन्नोअग्नेवरुणस्यविद्वानितिशाल्मलीपल्लवेन सुगंनःपंथामभयंकृणोत्वितिजंबूपल्लवेन असुन्वंतमयजमानमिति अशोकपल्लवेन तत्त्वायामीतिप्लक्षेण वायोयेतेसहस्रिणइति चूतपल्लवेन वयःसोमेतिवटपल्लवेन तमीशानमितिबिल्वपत्रेण । नमोअस्तुसर्पेभ्यइतिनागकेसरपल्लवेन ब्रह्मजज्ञानमितिपलाशपल्लवेन स्ना० । ततःसुमंगलघोषैः कनिक्रदादितिचतुर्भिःकुंभैःएकेनवाकुंभेनदेवंस्नापयित्वा सुगंधिनासितवस्त्रेणपरिमृज्यविश्वतश्चक्षुरितिसंकलीकृत्यदेवमावा हयेत् । एह्येहिभगवन्विष्णोलोकानुग्रहकाम्यया । यज्ञभागंगृहाणेमंवासुदेवनमोस्तुते । हिरण्यवर्णामितिपाद्यम् ॥ हिरण्यवर्णाःशुचयइत्य र्घ्यम् । विभ्राड्बृहत्पिबत्वित्याचमनीयम् । त्र्यंबकमितिचंदनम् । अभिवस्त्रेतिवस्त्रम् । वेदाहमेतंपुरुषमित्युपवीतम् । तेनैवउत्तरी यंच । इदंविष्णुरितिपुष्पम् । धूरसिधूर्वेतिधूपम् । चंद्रमामनसइतिदीपम् । अन्नपतेन्नस्येतिनैवेद्यं आचमनंपुष्पांजलिंदत्त्वा–प्रार्थ नांकृत्वा स्नानवस्त्रनैवेद्यादिकंशिल्पिनेदद्यात् ॥ इतिदेवस्नपनविधिः ॥ अथदेवंपुरुषसूक्तेनस्तुत्वा–उत्तिष्ठोत्तिष्ठगोविंदत्यजनिद्रांज गत्पते । त्वयिसुप्तेजगत्सुप्तमुत्थितेचोत्थितंजगत्–इतितमुत्थाप्यरथमारोप्यमंगलघोषेण कनिक्रददितिसूक्तेनचप्रासादप्रादक्षि ण्येनानीययागमंडपपश्चिमद्वार्याकृष्णेनेतिमंत्रेणप्रवेश्यवेद्याः पश्चिमभागेप्राङ्मुखमुपवेश्यमधुपर्कंकुर्यात् ॥ ततोवेद्यांकुशानास्तीर्य तदुप

रिशय्यामास्तीर्यं वेद्याःपूर्वादिदिक्षुविष्णुमधुसूदनत्रिविक्रमवामनानाग्नेयादिकोणेषुश्रीधरहृषीकेशपद्मनाभदामोदरांश्चपूजयेत् । ॐ नमो
नारायणायेतिमंत्रेणविष्णुंशय्यायांनिवेशयेत् । शिवादिप्रतिष्ठायांतुनमः शंभवायेतिशय्यायांनिवेश्य भवं शर्वं इशानं पशुपतिं रुद्रं उग्रं
भीमं महांतंच पूर्वादिक्रमात्पूजयेत् । ततःशय्यायांदेवंस्वापयित्वा त्रिभिर्वस्त्रैर्देवमाच्छाद्यदेवस्यशिरोदेशभूमौसहिरण्यंनिद्राकलशमपोदे
वीरुपहूयेतिप्रतिष्ठाप्य आप्यायस्वसमितिमधुसर्पिभ्यांदेवमभ्यज्ययातेरुद्रेतितैलसर्षपैरुपलिप्यगंधादिनाभ्यर्च्य बृहस्पतेपरिदीयेतिसि
तंपरिसरंदद्यात् । अत्रवाबृहस्पतेपरीतिमंत्रेणदेवस्यकंकणबंधनमित्येके ॥ ततोदेवस्यपादनाभिवक्षःशिरःसु विश्वतश्चक्षुरित्यालंभनम् ॥
ततस्तद्दक्षिणपार्श्वेछत्रंव्यजनंचामरंचचरणदेशेपादुके पार्श्वयोःशांतिकुंभौ आसनदर्पणघंटाभक्ष्यभोज्यजलपात्रादिकंचदेवस्यपुरतःस्थाप
येत् । ततोभस्मदर्भतिलैर्देवस्यपरितोरक्षार्थंप्राकारत्रयंकृत्वा मंडपाद्बहिर्गत्वा प्रतिदेशंलोकपालेभ्योगंधादिपूर्वकंबलिंदद्यात् । भूतेभ्यश्च
त्र्यंबकमिति । बलिमंत्रस्तु पूर्वदिग्वासिभ्योदिक्पतिदिग्भूताधिपतिदिग्रुद्रदिङ्मातृदिक्क्षेत्रपालेभ्योनमःइत्येवंप्रतिदिशम् । ततआचम्यहोमंकु
र्यात् । तद्यथा ॐ परायविष्णवात्मनेस्वाहेतिविष्णवे । अन्यदेवतायांशिवात्मनेइत्याद्यूहः । अनेनाष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिम
ष्टौवातिलैर्यवैर्वाप्रत्येकंहुत्वाप्रतिमायांन्यासान्कुर्यात् । अपादयोः उहृदये मललाटे इतिप्रणवंन्यसेत् । भूःपादयोः भुवःहृदये स्वःललाटे इति
व्याहृतीर्न्यसेत् । अतालुके आमुखे इदक्षिणनेत्रे ईवामनेत्रे उदक्षिणश्रवणे ऊवामश्रवणे ऋदक्षिणगंडे ॠवामगंडे. ऌदक्षिणनासापुटे ॡवामना
सापुटे एऊर्ध्वदशनेषु ऐअधोदशनेषु ओऊर्ध्वौष्ठे औअधरोष्ठे अंललाटे अःजिह्वायां यत्वचि रचक्षुषोः लनासिकायां वदशनेषु शश्रोत्रयोः ॥ ७ ॥
षउदरे सकटिदेशे हहृदये क्ष नाभ्यां ळलिंगे पफबभम दक्षिणबाहौ तथदधनवामबाहौ टठडढणदक्षिणजंघायां चछजझञवामजंघायांकखग

घङ सर्वांगुलीषु॥इतिमातृकान्यासः॥रविचंद्राभ्यांनमोनेत्रयोः भौमाय॰हृदये बुधाय॰स्कंधे बृहस्पतये॰जिह्वायांशुक्राय॰लिंगे शनैश्वराय॰ ललाटे राहवे॰पादयोः केतवे॰केशेषु रोहिणीभ्यो॰ हृदये मृगशिरसे॰ शिरसि आर्द्रायै॰ केशेषु पुनर्वसवे॰ ललाटे पुष्याय॰ मुखे आश्ले षाभ्यो॰ नासयोः मघाभ्यो॰ दंतेषु पूर्वाफाल्गुनीभ्यो॰ दक्षिणश्रवणे उत्तराफाल्गुनीभ्यो॰ वामश्रवणे हस्ताय॰ हस्तयोः चित्रायै दक्षि णेभुजे स्वात्यै॰ वामेभुजे॰ विशाखायै॰ हृदि अनुराधाभ्यः॰ स्तनयोः ज्येष्ठाभ्यो॰ दक्षिणकुक्षौ मूलाय॰ वामकुक्षौ पूर्वाषाढाभ्यो॰ कटिपार्श्वयोः उत्तराषाढाभ्यो॰ लिंगे श्रवणधनिष्ठाभ्यो॰वृषणे शतभिषग्भ्यो॰ नेत्रे पूर्वाभाद्रपदाभ्यो॰ दक्षिणोरौ उत्तराभाद्रप दाभ्यो॰ वामोरौ रेवतीभ्यो॰ दक्षिणजंघायां अश्विनीभ्यो॰ वामजंघायां भरणीभ्यो॰ दक्षिणपादे कृत्तिकाभ्यो॰ वामपादे । ध्रुवाय॰ नाभ्यां सप्तर्षिभ्यो॰कंठे मातृमंडलाय॰कटिदेशे विष्णुपदेभ्यो॰ पादयोः नागवीथ्यै॰ अंगवीथ्यै॰ वनमालायां ताराभ्यो॰ रोमकूपेषु अग स्त्याय॰ कौस्तुभे ॥ इतिग्रहादिन्यासः ॥ ४ ॥ चैत्राय॰ शिरसि वैशाखाय॰ मुखे ज्येष्ठाय॰ हृदये आषाढाय॰ कंठे श्रावणाय॰ स्तनयोः॰ भाद्रपदाय॰ उदरे आश्विनाय॰ कट्यां कार्तिकाय॰ दक्षिणोरौ मार्गशिर्षाय॰ वामोरौ पौषाय॰ दक्षिणजंघायां माघा य॰ वामजंघायां फाल्गुनाय॰ पादयोः संवत्सराय॰ परिवत्सराय॰ इद्वत्सराय॰ अनुवत्सरायनमः इतिदक्षिणोर्ध्वांत् प्राद क्षिण्येनचतुर्षुबाहुषु पर्वभ्यो॰ संधिषु ऋतुभ्यो॰ लिंगे अहोरात्रेभ्यो॰ अस्थिषु क्षणाय॰ लवाय॰ काष्ठायै॰ रोमसु कृताय॰ मुखे त्रेतायै॰ हृदये द्वापराय॰ नितंबे कलये॰ पादयोः मन्वंतरेभ्यो॰ बाह्वोः पराय॰ परार्धाय॰ जंघयोः महाकल्पाय॰ श रीरे उदगयनाय॰ दक्षिणायनायनमःपादयोः विषुवते॰ सर्वांगुलीषु ॥ इतिकालन्यासः ॥ ब्राह्मणाय॰ मुखे क्षत्रियाय॰ बाह्वोः

वैश्याय० ऊर्वोः शूद्राय० पादयोः संकरजेभ्यो० पादाग्रे अनुलोमजेभ्यो० सर्वांगसंधिषु गोभ्यो० मुखे अजाभ्यो० अविकाभ्यो० हस्तयोः ग्राम्यपशुभ्यो० कट्यां अरण्यपशुभ्यो० ऊर्वोः ॥ इतिवर्णन्यासः ॥ मेघेभ्यो० केशेषु अभ्रेभ्यो० रोमसु नदीभ्यो० सर्वगात्रेषु समुद्रेभ्यो० कुक्षिदेशे ॥ इतितोयन्यासः ॥ ऋग्वेदाय० शिरसि यजुर्वेदाय० दक्षिणभुजे सामवेदाय० वामभुजे सर्वोपनिषद्भ्यो० हृदये इतिहासपुराणेभ्यो० जंघयोः अथर्वांगिरसेभ्यो० नाभौ कल्पसूत्रेभ्यो० पादयोः व्याकरणाय० वक्त्रे तर्केभ्यो० कंठे मीमांसायै० निरुक्ताय० हृदये छंदःशास्त्रेभ्यो० ज्योतिःशास्त्रेभ्यो० नेत्रयोः गीतशास्त्रेभ्यो० भूतशास्त्रेभ्यो० श्रोत्रयोः आयुर्वेदाय० दक्षिभुजे धनुर्वेदाय० वामभुजे योगशास्त्रेभ्यो० हृदये नीतिशास्त्रेभ्यो० पादयोः वश्यतंत्राय० ओष्ठयोः ॥ इतिविद्यान्यासः ॥ दिवे० मूर्ध्नि सूर्यलोकाय० चंद्रलोकाय० नेत्रयोः अनिललोकाय० घ्राणे व्योम्ने० नाभ्यां समुद्रेभ्यो० वस्तिदेशे पृथिव्यै० पादयोः ॥ इतिवैराजन्यासः ॥ हिरण्यगर्भाय० शिरसि कृष्णाय० केशेषु रुद्राय० ललाटे यमाय० भृकुट्यां अश्विभ्यां० कर्णयोः वैश्वानराय० मुखे मरुद्भ्यो० घ्राणे वसुभ्यो० कंठे रुद्रेभ्यो० दंतेषु सरस्वत्यै० जिह्वायां इन्द्राय० दक्षिणभुजे बलये० वामभुजे प्रह्लादाय० दक्षिणस्तने विश्वकर्मणे० वामस्तने नारदाय० दक्षिणकुक्षौ० अनंतादिभ्यो० वामकुक्षौ वरुणाय० हस्तयोः मित्राय० पादयोः विश्वेभ्योदेवेभ्यो० ऊरुमध्ये पितृभ्यो० जानुमध्ये यक्षेभ्यो० जंघयोः० राक्षसेभ्यो० गुल्फयोः पिशाचेभ्यो० पादयोः असुरेभ्यो० पादांगुलीषु विद्याधरेभ्यो०पार्ष्ण्योः ग्रहेभ्यो० पादतलयोः गुह्यकेभ्यो० गुदे पूतनादिभ्यो० नखेषु गंधर्वेभ्यो० ओष्ठयोः कार्तिकेयाय गणेशाय० कटिपार्श्वयोः ॥ इतिदेवयोनिन्यासः ॥ मत्स्याय० मूर्ध्नि कूर्माय० पादयोः नृसिंहाय० ललाटे वराहाय० जंघयोः वामनाय०

कलशैः पंचदैवत्यैः नमःशं[1]भवेइतिप्रथमेन हंसःशुचिषदितिद्वितीयेन यातेरुद्रेतितृतीयेन विष्णोरराटमसीतिचतुर्थेन ब्रह्मजज्ञानमितिपंचमे
नसंस्नाप्य–शतंजीवशरदोवर्द्धमानइतिदूर्वाक्षतपुष्पैःसंपूज्यवस्त्रेणाच्छाद्यद्वितीयवेद्यांभद्रंकर्णेभिरितिभद्रासनंविधायास्तीर्णबर्हिरुपनोयाहिवी
तयइतिप्रागग्रान्कुशानास्तीर्यतत्रप्रणवेनदेवंनिधायप्राङ्मुखोभूत्वाकुंकुमाक्तेनसूत्रेणलिंगमावेष्टचप्रतिमायांमुखेलिंगस्यचनेत्राणिसुवर्णशला
कयाचित्रं देवानामित्यर्धेचैनकल्पयेत् । ऊर्ध्वाधःपृथग्भूतंपक्ष्मपुटद्वयंच आकृष्णेनेतिकल्पयेत् । नेत्रमध्येत्रिभागेनकनीनिकामपि
कल्पयेत् । तदानकश्चित्पुरतस्तिष्ठेत् । सुवर्णपायसंभक्ष्यंभोज्यमादर्शंचशीघ्रंदर्शयेत् । ततःशिल्पीलोहेनोल्लिखेत् । गुरुर्मधुसर्पिभ्यामभ्य
ज्येमंमेगंगइतिमंत्रेणाभ्युक्ष्यपुनर्मृदाद्येकादशकल[2]शैःस्नापयेत् ॥ प्रतिमाबहुत्वेमृदादिकलशोदकंकिंचित्स्थापयित्वातासांनेत्रेषूल्लिख्यते
नस्नपयेत् । यजमानःसुवर्णशलाकास्नानवस्त्रादिकंचाशिल्पिने दत्त्वासहिरण्यां गांगुरवेदद्यात् । गुरुरुत्तरस्यां वेद्यांभद्रासनेभद्रामितिदेवंस्थाप
यित्वा कल[3]शेनसमुद्रज्येष्ठाइतिसंस्नाप्यसंपूज्यदूर्वाक्षतान्मूर्ध्निदत्त्वाप्रार्थयेत्–नमस्तेचैंसुरेशानिप्रकृतेविश्वकर्मणः । प्रभाविताशे
षजगद्धात्रितुभ्यंनमोनमः । त्वयिसंपूजयामीशंनारायणमनामयम् । हारिताशेषदोषैस्त्वंऋद्धियुक्तासदाभवेति । ततोदेवस्यदक्षिणहस्तेप्रति
मावितस्तिमात्रमूर्णासूत्रंकनिक्रदादितिमंत्रेणबध्नीयात् । सर्वसत्त्वमयंशांतंपरब्रह्मसनातनम् । त्वामेवालंकरिष्यामित्वंवंद्योभवतेनमः–इति
पठित्वाचतु[4]र्भिःकलशैःस्नापयेत् । इदमापःप्रवहतेत्याद्येन आपोदेवीरितिद्वितीयेन इमंमेगंगइतितृतीयेन तत्त्वायामीतिचतुर्थेन अग्निर्मूर्धादि

१ शंभवायेतिवा । २ पूर्वोक्तमंत्रैः । ३ पंचदशांतर्गतेन । ४ पंचदशशुद्धजलकलशांतर्गतैः ।

वइत्यष्टपलमृत्तिकाकलशेन[1] समुद्रज्येष्ठाइतिशुद्धोदककलशेन[2] गंधद्वारामितिसप्तपलमितगोमयकलशेन वरुणस्योत्तंभनमसीतिशुद्धोदकेन तत्सवितुरितिद्वादशपलगोमूत्रकलशेन आपोहिष्ठेतिशुद्धोदकेन प्रसद्येतिमुष्टिसंमितभस्मकलशोदकेन योवःशिवतमोरसइति शुद्धोदकेन पयः पृथिव्यामितित्रिपलसंमितपंचगव्यकलशेन देवीरापःसंमधुमतीर्मधुमतीभिःसृज्यध्वंइतिशुद्धोदकेन आप्यायस्वेतिषोडशपलक्षीरकुंभेन तस्माअरंगमामवइतिशुद्धोदकेन दधिक्राव्णइतिविंशतिपलदधिकुंभेन युंजानइत्युदकुंभेन घृतवतीभुवनानामितिसप्तपलघृतकुंभेन देवस्यत्वेतिजलेन मधुवाताइतित्रिपलमधुकुंभेन आपोअस्मानितिजलेनआयंगौरितित्रिपलशर्कराकुंभेन आपोहयद्बृहतीरित्युदकेन प्रक्षाल्ययज्ञायज्ञावइतिवस्त्रेणसंमार्ज्य सुगंधतैलेनाभ्यज्य द्रुपदादिवेति यवशालिगोधूममसूरबिल्वचूर्णैरुद्वर्त्य यातेरुद्राशिवातनूरिति आमलकचूर्णेन यक्षकर्दमेनकर्दमेनप्रजाभूतेतिलिंपेत् ॥ यक्षकर्दमस्तु—कस्तूरिकायाद्वौभागौद्वौभागौकुंकुमस्यच ॥ चंदनस्यत्रयोभागाः शशिनस्त्वेकएवहीत्युक्तः । ततोजटामांस्यानुलिप्य मानस्तोकेप्रतद्विष्णुरितिकलशद्वयेनस्नापयित्वा अपामसोमममृताअभूमेतिपंचामृतेन संस्नाप्य अयंराजावरुणोनुमन्यतां १ यथाविप्रस्य० २ संतेपयाꣳसि० ३ आप्यायस्वमिदंतमसोम० ४ अश्वग्नेसधिष्टवसौ० ५ इतिपंचभिःशुद्धजलपूरितकलशैःक्षालयेत् । गंधद्वारामितिगंधोदकेन यज्ञायज्ञावइतिपंचपल्लवकषायकलशोदकेन याओषधीःपूर्वाजाताइत्यौषधीकलशेनओषधीःप्रतिमोदध्वमितिपुष्पकलशोदकेन याःफलिनीरित्यष्टफलकलशोदकेन हिरण्यगर्भइतिसुवर्णोदकेन हविष्मतीरितिशृंगोदकेन धान्यमसीतिधान्योदकेन सहस्राक्षेणेतिसहस्रधारकलशेन यादिव्याइतिस

१ मृदादिदशकलशांतर्गताद्यकलशेन । २ पंचदशशुद्धोदककलशांतर्गतेनषष्ठेन । अत्रसर्वत्रशुद्धजलस्नानंसप्तादिक्रमेणज्ञेयम् ।

एकस्मिन्सर्वौषध्यः । दशकमात्पुष्पैः फलैः सौवर्णजलेनगोशृंगोदकेनधान्यैः सहस्रच्छिद्रैः सर्वौषधिभिः पंचपल्लवैस्तीर्थोदकैर्नवरत्नैर्युताः कार्याः। अवशिष्टेषुदशसुकलशेषुकदंबशालमलीजंब्वशोकप्लक्षचूतवटबिल्वनागकेसरपलाशपल्लवान्क्रमेणनिक्षिप्यशुद्धजलमापूर्यलोकपालानावाहयेत् सर्वेष्प्याकलशेष्वित्यनेनस्थाप्याः । सूक्ष्मवस्त्रंसुगंधितैलंयवशालिगोधूममसूरिकाबिल्वचूर्णमुद्वर्तनार्थं आमलकचूर्णं सुगंधियक्षकर्दमं जटामांसींचासादयेत् ॥ ततश्चतुरोमंगलकलशानेकं वास्थापयेत् ॥ तदंतेतीर्थोदककलशे—सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः ॥ आयांतु यजमानस्यदुरितक्षयकारकाः—इत्यादितीर्थान्यावाहयेत् । ततःसयजमानआचार्योमूर्तिस्थपतिभ्यांसहसुमंगलघोषंकर्मकुत्वाकुटींगत्वा भूमावुपलिप्यविधिवदग्निस्थापयित्वा प्रतिमानिर्माणेप्राणिवधादिदोषनिरासार्थं घृतेनतिलैर्वाहोमंकरिष्ये इतिसंकल्प्याऽऽज्यभागांतं हुत्वादेवमंत्रेणाज्याहुतिशतद्वयंहुत्वापूर्णाहुतिंचहुत्वाप्रतिमांकुशःसंमार्ज्यमधुघृताभ्यंगेनदेवस्यव्रणभंगंकृत्वासंपूज्यपंचगव्येनपृथक्पृथक्स्ना पयित्वापुनःसंपूज्यशिल्पिपूर्वकल्पितंकलशंसरत्नंसहिरण्यंसवस्त्रंदेवपुरतोनिधायमृदागोमयेनगोमूत्रेणभस्मनाक्षीरेणेतित्रिविक्रमोक्तरीत्याःज लांतरितेनस्नापयित्वा पुनःसंपूज्यशंखनादेनरथादिनादेवंमहामंडपप्रादक्षिण्येनस्नानमंडपमानयेत् । तत्रगुरुर्दक्षिणवेद्यांभद्रंकर्णैभिरितिप्राङ्मुखं देवंभद्रासनेनिवेश्यपूर्वकल्पितषट्कलशेष्वंत्यंस्थपतिकलशंहिरण्यादिसहितंदेवसमीपेनिधाय—काशीकुशस्थलीमायावंत्ययोध्यामथोःपुरी । शालग्रामंसगोकर्णनर्मदाचसरस्वती । तीर्थान्येतानिकुंभेस्मिन्विशंतुब्रह्मशासनात् । झषारूढासरोजाक्षीपद्महस्ताशशिप्रभा । आगच्छतुसरिज्ज्येष्ठागंगापापप्रणाशिनी । नीलोत्पलदलश्यामापद्महस्तांबुजेक्षणा ।[१] आयातुयमुनादेवीकूर्मयानस्थितासदा । प्राचीस

१ शांतिकलशोयम् ।

 रस्वतीपुण्यापयोष्णीगौतमीतथा । ऊर्मिलाचंद्रभागाचसरयूर्गंडकीतथा । जंबूकाचशतद्रूश्चकलिंगासुप्रभातथा । वितस्ताचविपाशा
 चशर्मदाचपुनःपुना । गोदावरीमहावर्ताशर्करावर्तमार्जनी । कावेरीकौशिकीचैवतृतीयाचमहानदी । विटंकाप्रतिकूलाचसोमनंदाचवि
श्रुता । करतोयावेत्रवतीदेविकावेणुकाचया । आत्रेयगंगावैतरणीकाश्मीरीह्लादिनीचया ॥ प्लावतीचशवत्रासाकल्माषाशंसिनीतथा ॥
वसिष्ठाचाथपापाचसिंधुवत्यारुणीतथा ॥ ताम्राचैवत्रिसंध्याचतथामंदाकिनीपरा । तैलकाह्लाचपाराचदुंदुभीनकुलीतथा ॥ नीलगंधा
चबोधाचपूर्णचंद्राशशिप्रभा । अमरेशंप्रभासंचनैमिषं पुष्करंतथा । आषाढिंडिंडिभारतंभारभूतंबलाकुलम् । हरिश्चंद्रंपरंगुह्यंगुह्यंमध्य
मकेश्वरम् । श्रीपर्वतंसमाख्यातंजलेश्वरमतःपरम् । आम्रातकेश्वरंचैवमहाकालंतथैवच ॥ केदारमुत्तमंगुह्यंमहाभैरवमेवच । गयाचैव
कुरुक्षेत्रंगुह्यंकनखलंतथा । विमलंचंद्रहासंचमाहेंद्रंभीममष्टकम् । वस्त्रादंरुद्रकोटिंचअविमुक्तंमहालयम् ॥ गोकर्णंभद्रकर्णंचमहेशस्था
नमुत्तमम् ॥ छागलाह्लंद्विरंडंचककोंटंमंडलेश्वरम् ॥ कालंजरवनंचैवदेवदारुवनंतथा ॥ शंकुकर्णंतथैवेहस्थलेश्वरमतःपरम् । एतान्य
श्वतीर्थानिगुह्यक्षेत्राणिसर्वशः । तानिसर्वाणिकुंभेस्मिन्विशंतुब्रह्मशासनादितिमंत्रेणतत्रतीर्थान्यावाह्यदेवंस्नपयेत् । यजमानश्चशिल्पिवर्गं
यथाशक्तिपूजयेत् । ततोगुरुर्बहिर्निर्गत्यासिद्धार्थघृतपायसैरुयंवकमितिप्रागादिदिक्षुबलिंदत्त्वाचम्यदेवसमीपमागत्यत्रातारमिंद्रमित्यादिदश
लोकपालमंत्रैर्मंडपांतर्दिक्षुरक्षांकृत्वादेवस्याग्रेचतुरोब्राह्मणानुपवेश्यस्वस्तिवाचयित्वा तेभ्यश्चदक्षिणांदत्त्वाऽऽशिषोगृहीत्वागुरुर्देवंस्नपयेत् ।
अग्निर्मूर्धेतिमृदा यज्ञायज्ञवइतिकषायैः गायत्र्यागोमूत्रेण गंधद्वारामितिगोमयेन मानस्तोकइतिभस्मना तत्सवितुरितिगंधतोयेन । ततःपंच

मुखे परशुरामाय॰ हृदये रामाय॰ बाहुषु कृष्णाय॰ नाभ्यां बौद्धाय॰ बुद्धौ कल्किने॰ जानुनि। केशवाय॰ शिरसि नारायणाय॰
मुखे माधवाय॰ ग्रीवायां गोविंदाय॰ बाह्वोः विष्णवे॰ हृदये मधुसूदनाय॰ पृष्ठे त्रिविक्रमाय॰ कव्यां वामनाय॰ जठरे
श्रीधराय॰ हृषीकेशाय॰ जंघयोः पद्मनाभाय॰ गुल्फयोः दामोदराय॰ पादयोः॥ इतिमूर्तिन्यासः॥ अश्वमेधाय॰ मूर्ध्नि॰ नरमेधाय॰
ललाटे राजसूयाय॰ मुखे॰ गोसवाय॰ कंठे द्वादशाहा॰ हृदि अहीनेभ्यो॰ नाभौ सर्वजिद्भ्यो॰ दक्षिणकट्यां सर्वमेधाय॰
वामकट्यां अग्निष्टोमाय॰ लिंगे अतिरात्राय॰ वृषणयोः आप्तोर्यामाय॰ ऊर्वोः षोडशिने॰ जान्वोः उक्थाय॰दक्षिणजंघायां वाजपे
याय॰ वामजंघायां अत्यग्निष्टोमाय॰ दक्षिणबाहौ चातुर्मास्याय॰ वामबाहौ सौत्रामण्यै॰ हस्तेषु पशिवष्टिभ्यो॰ अंगुलीषु दर्शाय॰
पौर्णमासाय॰ नेत्रयोः सर्वेष्टिभ्यो॰ रोमकूपेषु स्वाहाकाराय॰ वषट्काराय॰ स्तनयोः पंचमहायज्ञेभ्यो॰ पादांगुलीषु आहवनीयाय॰
मुखे दक्षिणाग्नये॰ हृदये गार्हपत्याय॰ नाभौ वेद्यै॰ उदरे प्रवर्ग्याय॰ भूषणेषु सवनेभ्यो॰ पादयोः इध्मेभ्यो॰ बाहुषु दर्भेभ्यो॰केशेषु।
इतिक्रतुन्यासः॥ अथमूलमंत्रन्यासः॥ आयुधन्यासः शक्तिन्यासः अंगन्यासः॥ इतिसाधारणाःसर्वत्र॥ वैष्णवमधिकृत्यतूच्यंते॥ धर्माय॰
मूर्ध्नि ज्ञानाय॰हृदि वैराग्याय॰ गुह्ये ऐश्वर्याय॰पादयोः॥ इतिगुणन्यासः॥ खड्गाय॰ शिरसि शार्ङ्गाय॰ मस्तके मुसलाय॰ दक्षिणभुजे
हलाय॰वामभुजे चक्राय॰ नाभ्यां जठरे पृष्ठेच शंखाय॰ लिंगे वृषणेच॥ गदायै॰ जंघयोर्जानुनोश्च पद्माय॰ गुल्फयोःपादयोश्च वज्राय॰
शक्तये॰दंडाय॰खड्गाय॰पाशाय॰ध्वजाय॰अंकुशाय॰त्रिशूलाय॰ चक्राय॰ पद्माय॰ शिवे॥ इत्यायुधन्यासः॥ लक्ष्म्यै॰ललाटे
सरस्वत्यै॰मुखे रत्यै॰गुह्ये प्रीत्यै॰कंठे कीर्त्यै॰ दिक्षु शांत्यै॰हृदि तुष्ट्यै॰जठरे पुष्ट्यै सर्वत्र॥इतिशक्तिन्यासः॥मूलमंत्रस्य॥ ॐहृदये।

 नमः शिरसि। भगवते शिखायां। वासुदेवायकवचे। सर्वत्र वौषट् नेत्रेषु। फट्करयोः अस्त्रं दक्षिणवामस्तनयोः श्रीवत्साय०उरसि कौस्तुभाय०
 कंठे वनमालायै० ॥ इत्यंगन्यासः ॥ ॐपादयोःनजानुनोः मोगुह्ये भनाभ्यां गहृदये वकंठे तेमुखे वानेत्रयोः सुभाले देमूर्ध्नि वादक्षिणपार्श्वे
यउत्तरपार्श्वे ॥ इतिद्वादशाक्षरन्यासः ॥ प्रतिमायांजीवन्यासः ॥ तत्रतेजोभावयित्वाबुद्धींद्रियकर्मेंद्रियमनःप्राणपंचकाहंकारतन्मात्रादिकं
सर्वसंयोज्यपुरुषभावंभावयित्वासर्वसाक्षिणंचभावयित्वातत्रतत्त्वत्रयंन्यसेत् ॥ तद्यथा आत्मतत्त्वाय० आत्मतत्त्वाधिपतयेब्रह्मणेनमः
पादयोः विद्यातत्त्वाय०विद्यातत्त्वाधिपतयेविष्णवे०हृदये शिवतत्त्वाय०शिवतत्त्वाधिपतयेरुद्राय०शिरसीति ॥ अथगायत्रीन्यासः
सूर्यस्य ॥ तपादांगुष्ठयोःत्सगुल्फयोः विजंघयोः तुजानुनोः वैऊर्वोः रेगुह्ये णिवृषणयोः यंकटिदेशे भनाभौ गोंजठरे देस्तनयोः
वहृदये स्यकंठे धीवदने मतालुदेशे हिनासिकाग्रे धिचक्षुषोःयोभ्रूमध्ये योललाटे नःपूर्वदिशि प्रदक्षिणदिशि चोपश्चिमदिशि दउत्तरदिशि
यामूर्ध्नि ॥ तत्सवंत्र तत्सवितुर्हृदये वरेण्यंशिरसि भर्गो देवस्यशिखायां धीमहिकवचे धियोयोनःनेत्रयोः प्रचोदयात्अस्त्रे ॥ इतिगायत्रीन्यासः॥
अथ वेदन्या० अग्निमीळे० पादयोः। इषेत्वा० गुल्फयोः। अग्नआयाहि० जंघयोः। शन्नः० जान्वोः। बृहद्रथंतरेऊर्वोः। स्वस्तिनः०
जठरे। दीर्घायुत्वाय० हृदये। श्रीश्चते० कंठे। त्रातारं० वक्रे। त्र्यंबकं० स्तनयोर्नेत्रयोश्च। मूर्धानं० मूर्ध्नि ॥ अथ द्वादशा
क्षरेणनारायणस्यमूर्तिन्यासः ॥ ॐ केशवाय० शिरसि। ननारायणाय० मुखे। मोमाधवायग्रीवायाम्। भगोविंदाय० कंठे।
गविष्णवे० पृष्ठे। वमधुसूदनायकुक्षौ। तेत्रिविक्रमाय० कटचाम्। वावामनायजंघयोः। सुश्रीधराय० वामगुल्फे। देहृषीके
शाय० दक्षिणे गुल्फे। वापद्मनाभाय० वामपादे। यदामोदरायदक्षिणेपादे। ॐ हुंहृदयानमः हृदये। विष्णवे० शिरसि। ब्रह्मणे०

शिखायाम् । ध्रुवाय० कवचे । चक्रिणे० अस्त्रायफट् । अस्त्रंहस्तयोः । नमःशंभवाय० गायत्रींदक्षिणनेत्रे । विजयाय० सावित्रीं वामनेत्रे । चक्रिणेचक्ररूपाय० पिंगलास्त्रंदिक्षु ॥ इत्यष्टांगविष्णुमंत्रन्यासः ॥ सहस्रशीर्षा० पादयोः । पुरुषएवे० जंघयोः । एतावानस्य० जानुनोः । त्रिपादूर्ध्वे० ऊर्वोः । ततोविराट्० वृषणयोः । तस्माद्यज्ञात्० कट्याम् । तस्माद्यज्ञा० नाभ्याम् । तस्मा दश्वा० हृदि । तंयज्ञं०स्तनयोः । यत्पुरुषं०बाह्वोः । ब्राह्मणोस्य०मुखे । चंद्रमामनसो० चक्षुषोः । नाभ्याआसीदं०कर्णयोः । यत्पुरुषेण० भ्रुवोः । सप्तास्या० भाले । यज्ञेनयज्ञं० शिरसि । अद्भ्यःसभृतः० हृदये । वेदाहं० शिरसि । प्रजापतिः० शिखायाम् । योदे वेभ्यः० कवचे । ऋचंब्राह्मयं० नेत्रयोः । श्रीश्वते० अस्त्रे । इतिपुरुषसूक्तादिन्यासः ॥ अथशिवस्यपंचब्रह्मन्यासः ॥ अंगुष्ठयोरी शानं । तर्जन्योस्तत्पुरुषं । मध्यमयोरघोरं । अनामिकयोर्वामदेवं । कनिष्ठिकयोःसद्योजातं । ततःकनिष्ठिकयोर्हृदयं । अनामि कयोःशिरः । मध्यमयोःशिखा । तर्जन्योःकवचं । अंगुष्ठयोरस्त्रंविन्यस्य । परेणतेजसासंयोज्य कवचेनावगुंठ्य । सर्वकर्मसुनियो जयेत् । आचमनंसर्वत्र ॥ इत्थंदेवस्यकरन्यासंकृत्वालिंगमुद्रांबद्ध्वाईशानःसर्व० सदाशिवोम् ॥ इतिमंत्रेणईशानमुष्टिंबध्नीयात् ॥ ततः अंगुल्यग्रैः रुद्रमुद्रयामूर्ध्नि ॥ तत्पुरुषायविद्महे ॥ महादेवायधीमहि । तन्नोरुद्रः प्रचोदयात्–इति । एवंतर्जन्यंगु ष्ठयोगात्तत्पुरुषं० मुखे । अघोरेभ्यो० इतिमध्यमांगुष्ठयोगेनहृदि । अघोरं० वामदेवायनमो० मनोन्मनायनमइत्यंगुष्ठा नामिकयोगेनगुह्ये । सद्योजातं० भवोद्भवायनमः इतिकनिष्ठांगुष्ठयोगेन पादादारभ्यमस्तकांतंयावन्मूर्तिंव्यापकत्वेनब्रह्मन्यसेत् । ततः ईशानःसर्वविद्यानामितिशशिनमुपरितनमूर्ध्नि । ईश्वरःसर्वभूतानामितिकल्पितचंद्रोदयदलंमूर्ध्निपूर्वे ॥ ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मनमइति

इष्टांदक्षिणमूर्ध्नि० शिवोमेअस्तुनमइतिमरीचिमुत्तरमूर्ध्नि । सदाशिवोंनमइतिज्वालिनींपश्चिममूर्ध्नि । ततःतत्पुषायविद्महेनमइतिपूर्वव क्रेशांतिं । महादेवायधीमहीतिदक्षिणवक्रेविद्यां ॥ तन्नोरुद्रइत्युत्तरवक्रेप्रतिष्ठां । प्रचोदयादितिपश्चिमवक्रेधृतिमितितत्पुरुषकलाचतुष्टय न्यासः ॥ ततःअघोरेभ्यइतिमांहृदये । अथघोरेभ्योनमइतिरजांमुरसि । घोरजरायैस्कंधयोः । घोरतरेभ्योनिद्रायै नाभौ । सर्वेभ्यःसर्व व्याध्यैकुक्षौ । सर्वशर्वेभ्यःमृत्यवे० पृष्ठे । नमस्तेअस्तुक्षुधायै० वक्षसि । रुद्ररूपेभ्यस्तृषायै० उरसि । इत्यष्टावघोरकलाः । वामदेवाय नमइतिरजांगुह्ये । ज्येष्ठायनमइतिरक्षांलिंगे । श्रेष्ठायनमइतिरतिंदक्षिणोरौ । रुद्रायनमइतिकल्पांवामोरौ। कालायनइतिकामांदक्षिणजानौ । कलविकरणायनमइतिसंजीविन्यै०वामजानौ । बलविकरणायनमःक्रियायै० दक्षिणजंघायां । बलायनमःवृद्ध्यै०वामजंघायां । बलच्छाया यै दक्षिणस्फिचि । प्रमथनायनमःधात्रींवामस्फिचि । सर्वभूतदमनायनमइतिभ्रमणींकट्यां । मनोनमइतिपोषिणींदक्षिणपार्श्वे । उन्म नायनमइतिज्वरांवामपार्श्वे ॥ इतित्रयोदशकलाः ॥ सद्योजातंप्रपद्यामिनमइतिसिद्धिंदक्षिणपादे । सद्योजातायवैनमोनमइतिऋद्धिंवामपादे । भवेनमइतिकीर्तिंदक्षिणपाणौ । अभवेनमइतिलक्ष्मींवामपाणौ । नातिभवेनमइतिमेधांनासायाम् ॥ भवस्वमांनम इतिकांतिंशिरसि । भवन मइतिस्वधांदक्षिणबाहौ ॥ उद्भवायनमइतिप्रभांवामबाहौ ॥ इतिसद्योजातकलाष्टकम् । ततस्तमाद्याःसर्वाःअत्रै[१]विंशंत्वितिकलांतरन्यास भावनांकृत्वामुद्राश्चप्रदर्श्यविद्यादेवंहंसंसंपाद्यहंसहंसेतिहृदयादिन्यासंकुर्यात् ॥ अथनृसिंहे—नृसिंहउग्ररूपज्वलज्वलंप्रज्वलप्रज्वलस्वाहा— इतिमंत्रः ॥ नारसिंहीयदास्थाप्यात्वधिवास्यानिशागमे ॥ कृत्रिमंवाथसाक्षाद्वापशुंदत्त्वाबलिंहरेत् ॥ एवंन्यासंकृत्वापरमेष्ठिनंनमस्कृत्य

१ आवाहन्यादिकाः ।

निद्रामावाहयाम्यहम् ॥ मोहिनींसर्वभूतानांमनोविभ्रमकारिणीम् ॥ विरूपाक्षेशिवेशांतेआगच्छत्वंतुमोहिनि ॥ वसुदेवहितेकृष्णेकृष्णां
बरविभूषिते ॥ आगच्छसहसाजस्रंसुप्तेसंसारमोहिनि ॥ सुषुप्स्वसंहरेदेविकुमार्येकांतमानसे ॥ श्रमनिःश्वासवाह्यंचआगच्छभुवनेश्वरि ॥ तमः
सत्त्वरजोपेतेआगच्छत्वरिवारिणि ॥ मनोबुद्धिरहंकारःसंहारस्त्वंसरस्वति ॥ शब्दःस्पर्शश्चरूपंचरसोगंधश्चपंचमः ॥ आगच्छगृह्णसंक्षिप्यमो
हपाशनिबंधिनि ॥ भवस्योत्पत्तिहेतुस्त्वंयावदाभूतसंप्लवम् ॥ भुवःकल्पांतसंध्यायांवससेत्वंचराचरे ॥ भोगिशय्याप्रसुप्तस्यवासुदेवस्यशा
सने ॥ त्वंप्रतिष्ठासिवैदेविमुनियोनिसमुत्थिते । पितृदेवमनुष्याणांसयक्षोरगरक्षसाम् ॥ पशुपक्षिमृगाणांचयोगमायाविवर्धिनि ॥ वससेसर्व
सत्त्वेषुमातेवहितकारिणि ॥ एहिसावित्रिमूर्तिंत्वंचक्षुर्भ्यांस्थानगोचरे ॥ विशनासापुटेदेविकंठेचोत्कंठिताविश ॥ प्रतिभावयमांसर्वमातृवद्दे
विसुंदरि ॥ इदमर्घ्यंमयादत्तंपूजेयंप्रतिगृह्यताम् ॥ उपप्रागात्परमंयदितिमंत्रोयंतस्याःपूजाविधेःस्मृतः ॥ निद्राकलशेनिद्रांपूजयित्वालोक
पालमातृक्षेत्रपालभूतेभ्योबलिंदत्त्वास्थाप्यदेवंशय्यातःप्राच्यांसर्वतोभद्रेपूजयेत् ॥ विष्णुश्चेद्द्वादशारेचक्रेमध्येऽष्टदलेपद्मेमूलमंत्रेणदेवंनिवे
शयेत् ॥ ॐहृंहृदयायनमः । इतिकार्णिकायांहृदयंपूजयेत् । विष्णवेनमइतिशिरःपूर्वपत्रे । ब्रह्मण्यायनमइतिशिखांदक्षिणे । ध्रुवायनमइति
कवचं पश्चिमे । चक्रिणेनमइत्यस्त्रमुत्तरे । शंभवायनमइतिगायत्रीमाग्नेयदले । विजयायनमःसावित्रीमीशानदले । ज्योतीरूपायनमोनै
ऋत्ये । चक्रिरूपायनमःपिंगलास्त्रं० वायव्ये ॥ इतिगर्भावरणम् ॥ आसुपूर्वादिक्रमेण—केशव नारायण माधव गोविंद विष्णु मधुसूदन
त्रिविक्रम वामन श्रीधर हृषीकेश पद्मनाभ दामोदरेतिनामभिःद्वादशमूर्तीःपूजयेत् ॥ इतिद्वितीयावरणम् ॥ प्रागादितःखड्गाय० गदायै०
चक्राय० शंखाय० पद्माय० हलाय० मुसलाय० शार्ङ्गाय० ॥ इतितृतीयावरणम् ॥ अथमूर्तीशाः ॥ पृथिवीमूर्तये० पृथिवीमूर्त्यधिपतये

शर्वाय० अग्निमूर्तये०अग्निमूर्त्यधिपतये पशुपतये० यजमानमूर्तये० यजमानमूर्त्यधिपतयेउग्राय० अर्कमूर्तये० अर्कमूर्त्यधिपतयेरुद्राय० जलमूर्तये० जलमूर्त्यधिपतयेभवाय० वायुमूर्तये० वायुमूर्त्यधिपतये०ईशानाय इंदुमूर्तये० इंदुमूर्त्यधिपतयेमहादेवाय० खमूर्तये० खमूर्त्यधिपतयेभीमाय० इत्यष्टौमूर्तीस्तदधिपांश्वार्चयेत् । वैष्णवे पंचैवमूर्तयः । तदापूर्वेपृथिवीमूर्तयेनमः पृथिवीमूर्त्यधिपतयेवासुदेवाय । दक्षिणेजलमूर्तये० जलमूर्त्यधिपतयेसंकर्षणाय० ।पश्चिमे अग्निमूर्तये०अग्निमूर्त्यधिपतये०प्रद्युम्नाय। उत्तरे वायुमूर्तये०वायुमूर्त्यधिपतयेअनिरुद्धाय०मध्येखमूर्तये०खमूर्त्यधिपतये नारायणाय० इति ॥ शैवेपंचमूर्तिपक्षे ब्रह्मविष्णुरुद्रेश्वरसदाशिवाःपंचमूर्तिपाः । इन्द्रादयस्तुसर्वत्रपूजनीयाः । ततःआचार्य्यः[1]क्रमेणपलाशोदुंबराश्वत्थापामार्गशमीसमिधांप्रत्येकंद्वादशसहस्रमष्टसहस्रंषट्स०त्रिस०मष्टशतंवाहिरण्यगर्भंइतिकुंड॥समीपेसंस्थाप्यशांतिकपौष्टिकैर्मंत्रैर्यथाविभागंसऋत्विग्जुहुयात् । प्रतिकुंडमेकैकऋत्विङ्मूर्तिपास्तत्तन्मंत्रेणपूज्याः॥ शन्नोवातःपवतांमातरिश्वाशन्नस्तपतुसूर्यः । अहानिशंभवंतुनःशंरात्रिःप्रतिधीयतां० ॥ शन्नइन्द्राग्नी० ॥ शन्नोदेवीरभि० ॥ इतिशांतिकमंत्राः ॥ पुष्टिर्नेरण्वाक्षिति० ॥ वास्तोष्पतेप्रतरणो० ॥ अमीवहा० ॥ त्र्यंबकं० ॥ इतिपौष्टिकाः ॥ ततोमूर्तिपाः ॥ पूर्वकुंडेपलाशसमिधामष्टसहस्रमष्टशतंवाघृतेनतिलैर्वाअग्निमीळे० इतिजुहुयुः । इषेत्वेतिदक्षिणे । अग्नआयाहीतिपश्चिमे । शन्नोदेवीरित्युत्तरे० ॥ यदाष्टौकुंडानि ॥ तदा ॐ वौषडित्याग्नेये । दशप्रणवान्सकृद्गायत्रींचोक्त्वानैर्ऋते । जातवेदसइतिवायव्ये ॥ नमोब्रह्मणइतीशानकुंडे । मूर्द्धानंदिवइतिपूर्णाहुतिंजुहुयुः । आहुतिसंपाताञ्छांतिकलशेकुंडसमीपस्थेपातयेयुः । ततोमूर्तिमूर्तिपलोकपालेभ्यःसमिद्भिर्घृतेनतिलैर्वाष्टसहस्रमष्टशतंवाजुहुयुः ।

१ पूर्तकमलाकरे पूर्वाद्यष्टकुंडेषुक्रमेणखादिरपलाशोदुंबरप्लक्षवटापामार्गाश्वत्थदशमी सामिद्भिः ।

तेषांमंत्रास्तुस्योनापृथिवीतिपृथिवीमूर्तेः । अघोरेभ्यइतिमूर्तिपतेः शर्वस्य । इन्द्रोयदोमरुत्वतइतीन्द्रस्य । अग्निंदूतमित्यग्निमूर्तेः ॥
यः पशूनांमित्यग्निमूर्तिपतेःपशुपतेः । अग्नआयाहीत्यग्नेः । असिंहिवीरसेन्यइतियजमानमूर्तेः । तमिंद्रंजोहवीमीतियजमानमूर्तिपतेरुग्रस्य ।
यमायसोमामितियमस्य । उदुत्यंजातवेदसमितिसूर्यमूर्तेः । आवोराजानमध्वरस्येतिसूर्यमूर्तिपतेरुद्रस्य । असुन्वतंसमंजहीतिनिर्ऋतेः ।
आपोहिष्ठेतिजलमूर्तेः । विभूषन्नग्नउभयानितिजलमूर्तिपतेर्भवस्य । इमंमेवरुणेतिवरुणस्य । वातआवातुभेषजमितिवायुमूर्तेः । तमीशा
नमितिवायुमूर्तिपतेरीशानस्य । आनोनियुद्भिरितिवायोः । वयंसोमव्रतइतिसोममूर्तेः । इंद्रंतंशुभेतिसोममूर्तिपतेर्महादेवस्य । अभित्यंदेवंसवि
तारमितिकुबेरस्य । आदित्प्रत्नस्येतिखमूर्तेः । मृगोनभीमः इति खमूर्तिपतेर्भीमस्य । अभित्वादेवसवितरितीशानस्य । ततोष्टसहस्राष्टश
ताष्टाविंशत्यष्टान्यतमसंख्ययामहाव्याहृतिभिस्तिलयवव्रीहिचर्वाज्यैःक्रमेणप्रत्येकंजुहुयुः ॥ ततोगुरुःस्थाप्यदेवतालिंगकेनमंत्रेणघृतेनतिलैर्वा
ष्टसहस्रमष्टशतंवाहुत्वापूर्णाहुतिंहुत्वादेवस्यदक्षिणकर्णेहोमंनिवेद्य पूर्वकुंडेघृताहुत्यष्टकंमूलमंत्रेणहुत्वादेवपादौस्पृशेत् । मूलमंत्रेणपूर्वोक्तसं
ख्ययायाम्यकुंडेहस्तेनदधिहुत्वादेवनाभिं वारुणकुंडेक्षीरंहुत्वाहृदयम् सौम्यकुंडेमध्वाहुतीर्हुत्वामूर्धानंस्पृशेत् । वारुणकुंडेमिश्रंघृतादिचतुष्ट
यंहुत्वातेनैवपूर्णांदत्त्वादेवसर्वांगंस्पृशेत् । ततः कूर्मशिलाब्रह्मशिलापिंडिकावाहनादिपरिचारकदेवांश्चवैदिकैर्नाममंत्रैर्वासंपूज्यमुख्यप्र
तिमायावामपार्श्वेऽधिवासयेत् । तानिमधुघृतेनाभ्यज्यप्रक्षाल्यसंपूज्यवस्त्रेणाच्छाद्यप्रतिमायाः पिंडिकायांस्वमंत्रन्यासंकुर्यात् ॥ तत्रविष्णु

१ यः पशूनां रक्षिताविष्ठितानांप्रजापतिःप्रथमजाऋतस्य । सहस्रधामाजुषता ॐ हविर्नःस्वाहा । २ ॐभूरग्नयेचपृथिव्यैचमहतेचस्वाहा । ॐभुवोवायवेचांतरिक्षायचमहतेचस्वाहा ।
ॐसुवरादित्यायदिवेचमहतेचस्वाहा । ॐभूर्भुवःसुवश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेचस्वाहा ।

श्वेत्स्थाप्यस्तदा ॐघंढंपंभंफंलक्ष्म्यैनमः । एतानिपंचाक्षराणिहृच्छिरःशिखाकवचनेत्रसंज्ञकानि । हुंफडंतोवावचनसमुदायः ॥ इतिपिंडिकायांपंचांगानिन्यस्य तत्त्वत्रयमूर्तिमूर्तिपांश्चपूर्ववद्विन्यसेत् । तदा ॐह्रीं श्रींह्रांक्षः परब्रह्मणेसर्वाधारायनमः । ॐह्रीं श्रींह्रांदिव्यतेजोधारिण्यैसुभगायैनमः इतिमंत्राभ्यामधिवासयेत् ॥ इत्यधिवासनम् । प्रासादेपिचेन्नूतनस्तस्याप्यधिवासनम् । तत्रप्रासादाग्रेएकाशीतिपदंमण्डलमक्षतैःकृत्वातेषुसप्तधान्यपुंजान्कृत्वाजलपूर्णानेकाशीतिकुंभाना[१]हृत्यतत्रनवनवकांकानांमध्यमंमध्यमंकोष्ठंज्ञात्वातेषुनवकुंभान्मध्यपूर्वादिक्रमेणविन्यस्यमध्यकुंभेशम्युदुंबराश्वत्थचंपकाशोकपलाशप्लक्षन्यग्रोधकदंबाम्रबिल्वार्जुनवृक्षसंभवपल्लवद्वादशकंसोमायवनस्पत्यंतर्गतायनमइतिनिःक्षिपेत् ॥ ततःपद्मकरोचनादूर्वांकुरदर्भपिंजूलश्वेतपीतसर्षपसितरक्तचंदनजातीकुसुमकुंदनंद्यावर्तमितिदशकंपूर्वे । यवव्रीहितिलसुवर्णरजतसमुद्रगामिनदीकूलमृत्तिकाभूम्यस्पृष्टगोमयमितिसप्तकमाग्नेये । सहदेवीविष्णुक्रांताभृंगराजमहौषधिशमीशतावरीगुडूचीश्यामाकमित्यष्टकंयाम्येकदलीपूगीफलनारिकेलबिल्वनारिंगमातुलिंगवदरीयामलकमितिफलाष्टकंनैर्ऋत्ये ॥ मंत्रसाधितंपंचगव्यंवारुणे । शम्युदुंबराश्वत्थन्यग्रोधपलाशकषायपंचकंवायव्ये ॥ शंखपुष्पीसहदेवीबलाशतावरीकुमारीगुडूचीवचाव्याघ्रीतिमूलाष्टकंसौम्ये ॥ वल्मीकादिसप्तमृत्तिकाईशानकुंभेनिधाय हिरण्यवर्णांहरिणीमितिमध्यकुंभानभिमंत्र्यशेषान्गंधोदकपूरितान्मध्यमादिकलशानांसमंतात्पूर्वादिक्रमेणाष्टौविन्यस्यमूलमंत्रेणाभिमंत्र्यसूत्रेणावेष्ट्यांतर्बहिरधस्तादूर्ध्वंचप्रासादंपंचगव्येनसंप्रोक्ष्य मूर्धानंदिवइतिवल्मीकमृदाविलिप्य समुद्रज्येष्ठाइतीशानदिक्स्थेनमृत्तिकाकुंभेनस्नापयेत् । यज्ञायज्ञावइति वायव्येनकषायकुंभेन । पयःपृथिव्यामितिवारुणेनपंचगव्यकुंभेन । याःफलिनीरितिनै

१ आजिघ्रकलशंमह्युरुधारापयस्वत्याविशंत्विंदवः ॥ [२]समुद्रमिवसिंधवः इतिमंत्रेणाहृत्य ।

ॠत्यफलकुंभेन । हँसः शुचिषदितिसौम्यस्थमूलकुंभेन । विष्णोरराटमसीति पूर्वकुंभेन । सोमंराजानमितिवह्निस्थकुंभेन । विश्वत श्चक्षुरितियाम्यकुंभेन । नमोस्तुसर्पेभ्यइतिमध्यमकुंभेन । इदमापःप्रवहतेत्यष्टभिःपूर्वादिक्रमेणप्रासादंसाशिखरंस्नापयेत् । एकाशीति कुंभासंभवेतुगंधोदकपूरितेनैककलशेन । शुंधध्वं दैव्यायकर्मणे इतिसंप्रोक्ष्यसूत्रेणावेष्टचस्नापयित्वादेवरूपंप्रासादंचिंतयित्वापताकादि नाशोभयित्वागंधादिनापूजयित्वातस्याधस्तादेवंसंचिंत्यमंत्रेणप्रासादमधिवासयेत् ॥ तद्यथा ॥ ॐ ह्रींसर्वं देवमयाचिन्त्यसर्वरत्नोज्ज्वलाकृते ॥ यावच्चंद्रश्चसूर्यश्चतावदत्रास्थिरोभवेत्यधिवास्यपिंडिकावाहनपरिवारदेवतानां तत्तन्मंत्रैः प्रत्येकमष्टाविंशतिसंख्याकंहोमंतिलैःकृत्वामूलमंत्रे णचर्वष्टोत्तरशतंहुत्वाचतस्रोगाविष्णुगायत्र्यादुग्ध्वाक्षीरेणविष्णुगायत्र्याचरुंश्रपयित्वादेवायनिवेद्य द्वादशब्राह्मणान्भोजयित्वाविष्णुर्मेत्राय तामितिवदेत् ॥ ततआचार्यायधेनूर्दत्त्वा रात्रौजागरणंकुर्यात् ॥ इतिप्रासादाऽधिवासनम् ॥ अत्रज्येष्ठमध्यमकनिष्ठानांप्रतिमानांसप्तरात्रं पंचरात्रं त्रिरात्रमेकरात्रंसद्योवाबल्यंतमधिवासनंकुर्यादितिपद्धतिकाराः ॥ अत्रश्लोकाः—अनेकदिननिर्वर्त्यैह्यधिवासनकर्मणि ॥ होमान ष्टौसहस्राणिविदधीरन्पृथक्पृथक् ॥ तस्मिन्नेकाहनिर्वर्त्यैकुर्यादष्टोत्तरंशतम् ॥ प्राग्वत्पूर्णाहुतिंहुत्वासकृज्जपंतिद्वारपाः । यद्वाप्रतिदिनं होममष्टोत्तरशतंशतम् ॥ दैशिकोमूर्तिपैःकुर्याद्यावत्कार्यसमाप्यते ॥ बलिंसंध्यासुतिसृषुमंत्रैर्दद्याद्यथोदितैः ॥ आचार्यैदक्षिणादेयात्र्ऋ त्विग्भ्यश्चस्वशक्तितः ॥ भोजनंचतथान्येभ्योदेयंवित्तानुसारतः ॥ विनाधिवासनंयज्ञःकृतोपिनफलप्रदः ॥ इति ॥ ततोगुरुर्बहिर्निर्गत्य प्रासादाभिमुखोभूत्वातदेवरूपंध्यायेत्॥तथाहि ॥ पादौपादशिलास्तस्यजंघापादोर्ध्वमुच्यते॥ गर्भश्चैवोदरंज्ञेयंकटिश्चकटिमेखला ॥ स्तंभाश्च बाहवोज्ञेयाघंटाजिह्वाप्रकीर्तिता ॥ दीपःप्राणोस्यविज्ञेयोह्यपानोजलनिर्गमः ॥ ब्रह्मस्थानंयदेतच्चतन्नाभिःपरिकीर्तिता ॥ हृत्पद्मंपिंडिका

ज्ञेयाप्रतिमापुरुषःस्मृतः ॥ पादद्वारस्त्वहंकारोज्योतिस्तच्चक्षुरुच्यते ॥ तदूर्ध्वंप्रकृतिस्तस्यप्रतिमात्मास्मृतोबुधैः ॥ तलकुंभादधोद्वारंतस्य
प्रजननंस्मृतम् ॥ शुकनासाभवेन्नासागवाक्षःकर्णउच्यते ॥ कपोतपालीःस्कंधोस्यग्रीवाचामलसारिका ॥ कलशस्तुशिरोज्ञेयंमज्जादि
प्रदसंहितम् ॥ मेदश्चैवसुधांविद्यात्प्रलेपोमांसमुच्यते ॥ अस्थीनिचशिलास्तस्यस्नायुःकीलादयःस्मृताः ॥ चक्षुषीशिखरास्तस्यध्वजाः
केशाः प्रकीर्तिताः ॥ एवंपुरुषरूपंतंध्यात्वाचमनसासुधीः ॥ प्रासादंपूजयेत्पश्चाद्गंधधूपादिभिःशुभैः ॥ सूत्रेणवेष्टयेद्देववासस्तत्परिकल्प
येत् ॥ प्रासादमेवमभ्यर्च्यवाहनंचाग्रमंडपे—इति ॥ ततःकुंडेवास्तोष्पतइतिमंत्रेणाष्टोत्तरशतंहुत्वादेवमंत्रेणचहुत्वापूर्णाहुत्यंतंसर्वंकृत्वा
दिग्बलिंदत्त्वादेवसमीपमागत्ययथासंभवंभूसुवर्णादिकंदत्त्वादेवायचात्मानंनिवेद्यप्रणमेत् ॥ यत्रतुस्वयंभूर्देवःप्रागेववाप्रतिष्ठितः प्रासादश्च
नूतनःतत्रापितदुत्तरेमंडपंकृत्वापूर्वेद्युः पुण्याहवाचननांदीश्राद्धदेवप्रतिष्ठोक्तमंडपस्थापनर्त्विग्वरणादिकंकुर्यात् । तत्रगुरुर्वेद्यांतदेवतामंड
लंकृत्वावास्तुदेवतापूजनाग्निप्रतिष्ठाग्रहपूजाज्यभागोत्तरग्रहहोमाशिख्यादिवास्तुपीठदेवतावास्तुदेवताहोमैकाशीतिकलशस्थापनानिकृत्वातैः
प्रासादंक्षालयित्वायजमानमभिषिच्यप्रासादमुत्सृजेदित्येतावानेवविधिः ॥ अथमंडपादुत्तरतःपूर्वकल्पितैःशांतिकलशादिजलैस्तंडुलाष्ट
दलोपरिष्टभद्रासनोपविष्टंसपरिवारंयजमानमभिषिंचेयुः॥ ततःआचार्यमूर्तिपब्राह्मणस्थपत्यादीन्परितोष्यप्रासादोत्सर्गंकुर्यात् ॥ तत्रमासपक्षा
द्युल्लिख्यइमंशिलेष्टकादार्वादिनिर्मितंवलभीजगतीप्राकारपरिवारगोपुरपरिवारदेवतालयसंयुतंतत्तद्देवतालोकावाप्तिकामः कुलद्वयानुग्रहाया
मुकदेवताप्रीतयेहमुत्सृजामीतिकुशयवजलानिक्षिप्त्वादेवंनत्वाब्राह्मणान्भोजयेदिति । ततःप्रातराचार्योमूलमंत्रेणमूर्तिमूर्तिपतिलोकपालमं
त्रैश्चप्रतिदैवतमष्टशतमष्टाविंशतिंवापूर्णाहुत्यंतंस्वकुंडेहुत्वाऽधिवासितांकूर्मशिलांब्रह्मशिलांपिंडिकांचत्रातारमिंद्रमिति० गृहीत्वाविघ्नाभावार्थं

पुष्पोदकधारयाऽस्त्रमंत्रेणशंतातीयेनवाप्रासादमभ्युक्ष्यमहाँइन्द्रोयइतिदर्भेणोल्लिख्यास्त्रपूतजलेनपुनःप्रोक्ष्यप्रासादस्यद्वारस्यचमध्यायवेनय
वार्धेनवेशानीमुत्तरांवाऽऽश्रित्यस्नानादिसंस्कृतांकूर्मशिलांप्रणवेनपंचरत्नोपरिनिधायतच्छ्वभ्रेसौवर्णंकूर्मंद्वारसंमुखंनिधायतदुपरिरत्नानिनिधाय
षट्त्रिंशद्वतंयुतांपंचचत्वारिंशद्वतंयुतांवाब्रह्मशिलामधिवासितांनिदध्यात् । ॐ नमोव्यापिनिस्थिरेअचलेध्रुवे ॐ श्रींलंस्वाहेतिमं
त्रेणयथाशक्तिसंपूज्य—त्वमेवपरमाशक्तिस्त्वमेवासनधारिका ॥ शिवाज्ञयात्वयादेविस्थातव्यमिहसर्वदेतिप्रार्थयेत् ॥ ततोवर्णा
ध्वने० पादाध्वने० मंत्राध्वने० भुवनाध्वने० तत्त्वाध्वने० सकलाध्वने० इतिसकलमध्वानंतदारूढंध्यायेत् । ततः
पुण्याहवाचनंकृत्वामूलमंत्रेणाष्टोत्तरशतंहुत्वाषट्त्रिंशत्सुपंचचत्वारिंशत्सुवाब्रह्मशिलागतेंषुप्रादक्षिण्येनसहेम्नाहस्तेनरत्नन्यासंकुर्यात् ॥ श्वभ्र
रहितेब्रह्मशिलोपरिभागेसश्वभ्रांपिंडिकांपूर्वपश्चिमाननेप्रासादेसौम्यप्रणालींदक्षिणोत्तराननेपूर्वप्रणालींध्रुवसूक्तेननिधायदेवपत्नीलिंगकेनमंत्रे
णपिंडिकामभिमंत्रयेत् ॥ तत्रविष्णोःस्थापनायां श्रीश्चतेलक्ष्मीश्चपत्न्यौ० ॥ रुद्रस्य० गौरीमिमाय० ॥ सूर्यस्य० उषस्तच्चित्र
माभरेत्यादि ॥ ततआत्मतत्त्वाय आत्मतत्त्वाधिपत्यैक्रियाशक्त्यै० विद्यातत्त्वाय० विद्यातत्त्वाधिपत्यैज्ञानशक्त्यै० शिवतत्त्वाय० शि
तत्त्वाधिपत्यैइच्छाशक्त्यै० ॥ इतितत्त्वन्यासः ॥ प्रतितत्त्वंमूर्तिंमूर्तिपतिलोकपालान्विन्यसेत् ॥ ततः पिंडिकायां आधारशक्त्यैनमइ
तिन्यस्यानंतासनतत्त्वेभ्योनमःआसनशक्तिभ्योनमइत्युक्त्वाभ्यर्च्य—सर्वदेवमयीशानेत्रैलोक्याह्लादकारिणि ॥ त्वांप्रतिष्ठापयाम्यत्रमंदि
रेविश्वनिर्मिते ॥ यावच्चंद्रश्चसूर्यश्चयावदेषावसुंधरा ॥ तावत्त्वंदेवदेशिमंदिरेस्मिन्स्थिराभव ॥ पुत्रानायुष्मतो लक्ष्मीमचलामज
रामृताम् ॥ अभयंसर्वभूतेभ्यः कर्तुर्नित्यंविधेहिभोः ॥ विजयंनृपतेः सर्वलोकानांक्षेममेवच ॥ सुभिक्षंसर्ववस्तूनांकुरुदेविनमोनमः ॥

 इतितांप्रार्थ्यप्रणवंश्वभ्रेबाह्येषोडशस्वरान् तेषांपरितोव्यंजनानिन्यस्य श्वभ्रांतिरत्नादीनिन्यसेत् ॥ यथा—बाह्यपरिधौयवव्रीहिनिष्पाव
प्रियंगुतिलमाषनीवारशालिसिद्धार्थकान् वज्रमौक्तिकवैडूर्यशंखस्फटिकपुष्परागचंद्रकांतेंद्रनीलपद्मरागान् मनःशिलाहरितालांजनश्यामां
 जनकौसीसीसौराष्ट्रीरोचनागैरिकपारदान् सुवर्णरौप्यताम्रआयसत्रपुसीसकांस्यारकूटतीक्ष्णलोहानि श्वेतरक्तचंदनागरुवर्जुनोशीरवैष्णवी
सहदेवीलक्ष्मणाचेति ॥ तत्रबीजानामभावेयवान् रत्नानामभावेवज्रं धातूनामभावेहरितालं ताम्राद्यभावेसुवर्णं ओषधीनामभावेसहदेवींन्य
सेत्—इति ॥ एवंन्यस्तानांरत्नानांदिक्पालमंत्रैरालंभनंकृत्वा पृथिवीमेरुकूर्मवाहनानिसौवर्णानिद्वारोन्मुखानिपारदंचतस्मिन्मध्यश्वभ्रेनि
धायगुग्गुलुरसेनरत्नादिकंस्थिरीकृत्यमधुपायसेनश्वभ्रमनुलिप्यवस्त्रेणाच्छाद्यकवचेनावगुंठ्यास्त्रमंत्रेणसंरक्ष्यगृहावैप्रतिष्ठेतिप्रासादमभिषिंच्यें
द्रादिभ्योबलिंदत्त्वाचामेत् ॥ एवंपिंडिकांप्रतिष्ठाप्यप्रासादाद्बहिरष्टदिक्षुस्थंडिलानिसंपाद्यसंस्कृत्यतत्स्थंडिलानामीशानभागेषुकलशान्मंत्रव
द्भिन्यस्याग्नीन्प्रणीयप्रतिस्थंडिलंपलाशसमिधामष्टोत्तरसहस्रमष्टशतंवामूलमंत्रेणहुत्वाज्येनच—ॐनारायणायविद्महे । वासुदेवायधीमहि
तन्नोविष्णुःप्रचोदयात्—इतिमंत्रेणाष्टोत्तरशतमष्टाविंशतिमष्टौवाहुत्वाऽऽचार्योऽष्टदिक्संस्थेभ्यःकुंभेभ्यः पात्रेतोयमुद्धृत्यमूलमंत्रेणशतकृत्वो
भिमंत्र्यप्रतिमासन्निधौगत्वासर्वतीर्थमयमिदंजलमितिध्यायन्देवमूर्ध्न्यभिषिंचेत् ॥ नारसिंहेनहुंफडंतेनदेवस्यदिग्बंधनंकृत्वामूर्तिपैःसहदेवंप्रार्थ
येत् ॥ प्रबुध्यस्वमहाभागदेवदेवजगत्पते ॥ मेघश्यामगदापाणेप्रबुद्धकमलेक्षण ॥ प्रबुद्धभूधगानंतवासुदेवनमोस्तुते इति ॥ जल
क्षीरकुशाग्रतिलतंडुलयवसिद्धार्थकपुष्पाणिशंखेकृत्वा शंखमुद्रयादेवायार्घ्यंदत्त्वोत्तिष्ठब्रह्मणस्पत इतिदेवमुत्थाप्यरथेउपवेश्यदे
वस्यपुरतोगुरुःपृष्ठतोयजमानःपार्श्वतोमूर्तिपाःएवंपरिभ्राम्यरथादवतार्यप्रासादद्वारसंमुखंलिंगंकृत्वार्घ्यंदत्त्वाप्रासादंप्रवेशयेदिति ॥ ततः

सयजमानोदेशिकोदेवंपिंडिकायांस्थापयेत् ॥ तद्यथा–सुलग्नेईश्वरंभावयन्श्वभ्रन्यासद्रव्यसहितंसौवर्णपद्मंश्वभ्रेनिधाय–प्रधानपुरुषौ यावद्यावच्चंद्रदिवाकरौ । तावत्त्वमनयाशक्त्यायुक्तोत्रैवस्थिरोभवेत्युक्त्वाध्रुवाद्यौर्वापृथिवीतिमंत्रंपठित्वायवंयवार्धंवोत्तराश्रितमीशानाश्रितंवादे वंपिंडिकांवाश्वभ्रेनिधायस्थिरोभवशाश्वतोभवेत्युक्त्वापिंडिकालिंगांतरालंवालुकासीसकादिभिर्दृढंपूरयित्वापुनर्नचालयेत् ॥ ततोदेवंमूर्ध्निहृदये वास्पृष्ट्वाप्राणप्रतिष्ठांकुर्यात् ॥ सायथापूर्तकमलाकरोक्ताः;प्राणप्रतिष्ठांकुर्वीततस्यां देवस्यवाहरेइतिकालिकापुराणात्कार्या ॥ अस्यप्राणप्र तिष्ठामंत्रस्य । ब्रह्मविष्णुरुद्राऋषयः । ऋग्यजुः सामानिच्छंदांसि । क्रियामयवपुःप्राणाख्यादेवता । आंबीजं । ह्रींशक्तिः । क्रोंकीलकं । अस्यप्राणप्रतिष्ठायांविनियोगः ॥ ततऋष्यादीन्क्रमेणशिरोमुखहृदयनाभिगुह्यपादेषुविन्यस्य–ॐ कंखंगंघंङं अंपृथिव्यप्तेजोवाय्वाका शात्मनेआंहृदयायनमः । ॐ चंछंजंझंञंइंशब्दस्पर्शरूपरसगंधात्मनेईंशिरसेस्वाहा । ॐ टंठंडंढंणंउंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनो ऊंशिखायैवषट् । ॐ तंथंदंधंनंएंवाक्पाणिपादपायूपस्थात्मनेऐंकवचायहुं । ॐ पंफंबंभंमं ओं वचनादानविहरणोत्सर्गानंदात्मनेऔं ने त्रत्रयायवौषट् । ॐ अंयंरंलंवंशंषंसंहंळंक्षंमनोबुद्ध्यहंकारचित्तात्मनेअः अस्त्रायफट् । एवमात्मनिदेवेचकृत्वादेवंस्पृष्ट्वाजपेत् ॥ ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहंसः देवस्यप्राणाइहप्राणाः ॥ पुनः आंह्रींक्रोमित्यादिदेवस्यजीवइहस्थितः । ॐ आंह्रींक्रोंइत्यादिदेवस्यस र्वेन्द्रियाणि ॥ ॐ आंह्रींक्रोंइत्यादिदेवस्यवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणाइहागत्यस्वस्तयेसुखंचिरंतिष्ठंतुस्वाहाइति ॥ ध्रुवाद्यौरितिसूक्तंच जपित्वा ततोर्चाहृद्यंगुष्ठंदत्त्वाजपेत् ॥ अस्यैप्राणाः प्रतिष्ठंतु अस्यैप्राणाः क्षरंतुच । अस्यैदेवत्वमर्चायैस्वाहेतियजुरीरयेत् । प्रणवे नसंरुध्यदेवंसजीवंध्यात्वाविश्वतश्चक्षुरित्युक्त्वादेवमूर्ध्निहस्तंनिधायपरं देवंध्यात्वारुद्रसूक्तरैवतसामनीजप्त्वाप्रातिष्ठिकान्मंत्रांश्चजपेत् । तत्र

विष्णोः—अतसीपुष्पसंकाशंशंखचक्रगदाधरम् ॥ संस्थापयामिदेवेशंदेवोभूत्वाजनार्दनम् ॥ रुद्रस्य—त्र्यक्षंचदशबाहुंचचंद्रार्धकृत
शेखरम् ॥ गणेशंवृषभस्थंचस्थापयामित्रिलोचनम् ॥ अथब्रह्मणः—ऋषिभिःसंस्तुतं देवंचतुर्वक्त्रंजटाधरम् ॥ पितामहंमहाप्राज्ञंस्थाप
याम्यंबुजोद्भवम् ॥ अथ सूर्यस्य—सहस्राकिरणंशांतमप्सरोगणसेवितम् ॥ पद्महस्तंमहाबाहुंस्थापयामिदिवाकरम् ॥ ततोदेवस्यहृदयंस्पृ
शञ्जपेत् ॥ तद्यथा ॥ विष्णोःपुरुषसूक्तं । रुद्रस्यरौद्रं । ब्रह्मणोब्राह्मं । रवेःसौरं । अन्येषांतत्तत्प्रकाशकान्मंत्रान् जपित्वाप्रणवव्या
हृतिशिरःसहितांगायत्रींप्राणसूक्तंचजपित्वासान्निध्यंकुर्यात् ॥ नमस्तेत्यक्तसंगायतुष्टायपरमात्मने ॥ ज्ञानविज्ञानरूपायब्रह्मतेजोविभा
सिने ॥ गुणातिक्रांतवेगायपुरुषायमहात्मने ॥ अव्यक्तायपुराणायविष्णोसन्निहितोभव ॥ भगवन्देवदेवेशत्वंपितासर्वदेहिनाम् ॥ त्व
याव्याप्तमिदंसर्वंजगत्स्थावरजंगमम् ॥ त्वमिंद्रःपावकश्चैवयमोनिर्ऋतिरेवच ॥ वरुणोमारुतःसोमईशानःप्रभुरव्ययः ॥ येनरूपेणभगवं
स्त्वयाव्याप्तंचराचरम् ॥ तेनरूपेणदेवेशअर्चायांसन्निधौभव ॥ सर्वमंत्रादिसंयुक्तोलोकानुग्रहकाम्यया ॥ अत्रार्चायांमहादेवभवसन्निहितः
सदा ॥ सूर्याचंद्रमसौयावद्यावत्तिष्ठतिमेदिनी ॥ तावत्त्वयात्रदेवेशस्थातव्यंस्वेच्छयाप्रभो—इति ॥ अथस्थापितस्यपरिवारदेवताः ।
नंदिमहाकालवृषभभृंगिरिटिस्कंदोमाविनायकविष्णुब्रह्मजयंतेंद्राग्नियमानिर्ऋतिवरुणवायुसोमेशानाप्सरोगणगंधर्वगुह्यकविद्याधरादयःरुद्रस्य ।
ब्रह्मणोविष्णवादयः परिवारदेवताः । एवंचंडीविनायकादीनामपिपरिवारकल्पनम् । ततःकुंडेष्वंगहोमः । ततःपूर्वकुंडेहृदयमंत्रेणाज्या

१ प्राणसूक्तंतु यत्तेयमंवै ततः यत्तेदिवं ततः यत्तेभूमिं तत यत्तेचतस्रः ततः यत्ते समुद्रं तत यत्तेमरीचिः ततः यत्तेअपो ततः यत्तेसूर्यम् ततः यत्तेपर्व ततः यत्ते विश्व ततः
यत्ते पराः ततो यत्ते भूतम् ।

हुतिर्विंशतिकम् । दक्षिणकुंडेशिरोमंत्रेण । पश्चिमेशिखामंत्रेण ॥ उत्तरेकवचमंत्रेण ॥ आचार्यकुंडेनेत्रमंत्रेण । पुनःपूर्वकुंडे
ऽस्त्रमंत्रेणेति । ततआयुधमंत्रैर्हुत्वाप्रार्थयेत् ॥ तद्यथा—लोकानुग्रहहेत्वर्थंस्थिरीभवसुखासन ॥ सान्निध्यंहिसदादेवप्रत्यहंपरिवर्तय ॥
माभूत्पूजाविरामोऽस्मिन्यजमानःसमृध्यताम् ॥ संपालयसतांराष्ट्रंसर्वोपद्रववर्जितम् ॥ क्षेमेणवृद्धिमतुलांसुखमक्षय्यमश्नुताम्—इतिसंप्रार्थ्य
विधिनादेवंसांगंतमर्चयेदिति ॥ ततोबहिरिंद्रादीन्तत्तन्नाममंत्रैःस्थापयेत् । विष्णुश्चेच्चंडप्रचंडजयविजयादीन् । शिवश्चेन्नंदिमहाकालभृंगि
गणेशादीन् । सूर्यश्चेद्दंडपिंगलमाठरारुणादीन् ॥ अथशिवस्यवाहनादिपूजयेत् । यस्यांसिंहारथेयुक्ताव्याघ्राभूतास्तथोरगाः ॥ ऋषयोलोक
पालाश्चदेवःस्कंदस्तथावृषः ॥ प्रियागणामातरश्चसोमोविष्णुःपितामहः ॥ नागायक्षाःसगंधर्वायेचदिव्यानभश्चराः ॥ तमहंत्र्यक्षमीशानंशिवंरुद्रमु
मापतिम् ॥ आवाहयामिसगणंसपत्नीकंवृषध्वजम् ॥ आगच्छभगवन्रुद्रानुग्रहायशिवोभव ॥ शाश्वतोभवपूजां मेगृहाणत्वंनमोनमः ॥ स्वागतमनुस्वाग
तंभगवतेनमोनमः ॥ सोमायसगणायसपरिवारायप्रतिगृह्णातुभगवान्मंत्रपूतमिदमर्घ्यंपाद्यमाचमनीयमासनंब्रह्मणाभिहितंनमोनमःस्वाहेति ॥
आगच्छभगवन्नित्यादिकामंत्राऊहेनसर्वसाधारणाः ॥ एवंसंपूज्यदधिदुग्धघृतमधुशर्कराख्यैः समंत्रैर्मध्येसुगंधजलयुतैःस्नापयेत् ॥ ततोयज्जाग्रतः०
ततोविराट्० सहस्रशीर्षा० अभित्वाशूरनोनुमो० पुरुषएवेदं०त्रिपादूर्ध्व० येनेदंभूतं० नत्वावाऽअन्योदिव्यो० इतिचतुःकृत्वोजपेत् ।
प्रतिपर्यायंचजलेनदेवस्यपादौनाभिंवक्षःशिरश्चस्पृशेत् । ततोलिंगमंत्रैःप्रार्थयीत—भगवन्देवदेवेशधर्मकामार्थमोक्षद ॥ विद्याविद्येश्वरैरुद्रै
र्गणैर्शैलोकपालकैः ॥ देवदानवगंधर्वैर्यक्षैस्त्वंकिन्नरैःसह ॥ अस्मिँल्लिंगेमहादेवसर्वदावससेप्रभो ॥ पुंसामनुग्रहार्थायस्वेच्छयावससेप्रभो ॥
परावरेणभावेनस्थातव्यंसर्वदात्वया ॥ सर्वविघ्नहरःपुंसांसर्वदुःखहरःसदा ॥ सर्वदायजमानस्यइच्छासंपत्करोभव ॥ नमस्तेसर्वधर्मायसंतोष

विजितात्मने ॥ ज्ञानविज्ञानतृप्तायब्रह्मतेजोभिभासिने ॥ नमस्तेशुद्धदेहायपुरुषायमहात्मने ॥ स्थापकानांमूर्तिपानांशिल्पिनांचविभोसदा ॥
ग्रामदेशनृपाणांचशांतिर्भवतुसर्वदा ॥ पूजकाराधकानांचभक्तानांभक्तवत्सल ॥ सर्वेषांचजगन्नाथइच्छासिद्धिप्रदोभव ॥ चंद्रार्कावनिपर्यंतं
लिंगेस्मिन्परमेश्वर ॥ स्थातव्यमुमयासार्धंसर्वलोकानुकंपया ॥ यावच्चंद्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी ॥ तावत्त्वयात्रदेवेशस्थातव्यंस्वेच्छया
विभो ॥ ततःपुरुषसूक्तेनविष्णोःषोडशोपचारपूजनंकृत्वा पुराणमंत्रैरन्यैर्वास्तुत्वानमेत् । पुनःप्रार्थयेच्च—ज्ञानतोज्ञानतोवापियावद्विधिरनुष्ठि
तः ॥ ससर्वस्त्वत्प्रसादेनसमग्रोभवतान्ममेति । शिवस्यापि—ज्ञानतोज्ञानतोवापिभगवन्यत्कृतंमया ॥ तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादादधोक्षजे
ति ॥ अथकर्तृनामयुतं देवस्यनामकुर्यात्सर्वदाव्यवहारार्थम् ॥ तच्चविष्णोरमुकस्वामी ॥ अमुकनारायणइतिवा॥शिवस्याऽमुकेश्वरः ॥ भानो
रमुकादित्यः ॥ देव्याअमुकेश्वरी ॥ गणपतेरमुकविनायकइति॥ अथनैमित्तिकदोषेप्रायश्चित्तम्—तत्रस्थाप्यमानदेवार्चालिंगंवायांयांदिशमुपा
श्रयेत्तत्तद्दिगीशमंत्रेणाष्टोत्तरशतसंख्ययाशमीपलाशान्यतरसमिद्धोमंतिलहोमंवाकृत्वापूर्णाहुत्यंतंकुर्यात् । दिगीशमंत्रास्तुत्रातारमिंद्रमित्या
दयःप्रसिद्धाः।अत्राचार्यदक्षिणाश्च क्रमतोगजोमेषोमहिषोजःशुक्तिर्मुक्ताफलंसवस्त्रयुग्माधेनुर्ऋषभइत्यादिकाः। ततःस्थाप्यमानेदेवेशब्दोत्थाने
श्वभ्रांतेस्फुटितेवाशांत्यर्थंमूलमंत्रेणाष्टोत्तरशतंहुत्वाप्रतिष्ठाहोमंकुर्यात्—शिवायस्थिरोभवस्वाहा॥शिवायाप्रमेयोभवस्वाहा । शिवायानादिबो
धोभवस्वाहा । शिवायनित्योभवस्वाहा । शिवायसर्वगोभवस्वाहा । शिवायाविनाशोभवस्वाहा । शिवायाक्रमोभवस्वाहेति । अथसर्वशांत्यर्थम्
अघोरमंत्रेणाष्टोत्तरशतंस्विष्टकृदंतंहुत्वासर्वप्रायश्चित्तंपूर्णाहुतिंचहुत्वाईशानेबलिंदत्त्वाचम्यशोभनासनेयजमानमुपवेश्याथर्वणसाम्नामंत्रांतरै
श्चाभिषिंचेत् । अथाचार्यपूजनम्—तत्रयजमानःआचार्यमासनेउपवेश्यसत्कृत्यग्रामंगोसहस्रमर्धंतदर्धंवागोशतंतदर्धंतदर्धंवृषभैकादशकंपंचै

कांवागांसालंकारांयथाशक्तिसंनिधाय० देशकालौसंकीर्त्यदेवप्रतिष्ठासिद्ध्यर्थंइमांदक्षिणांतुभ्यमहमाचार्यायसंप्रददेनममेत्युक्तातद्धस्तेगोपु
च्छादिसकुशतिलयवजलंनिःक्षिपेत् । विज्ञापयेच्च।भगवन्सर्वधर्मज्ञशिवधर्मपरायण ॥ सर्वशास्त्रार्थतत्त्वज्ञशिवशास्त्रविशारद । अनादिजन्मसं
तानेह्यप्रमेयेभवार्णवे ॥ अद्यमेह्युत्तमंजन्मह्यद्यमेसफलंधनम् ॥ अद्यमेजननोच्छित्तिरद्यमेपरमंपदम् ॥ मोचितोहंत्वयानाथानुच्छेद्या
द्भवबंधनात् ॥ ईशत्रातस्त्वयायस्मात्प्लुवेनेवभवार्णवात् ॥ मुक्तोहंमर्त्यसंसारात्प्रपन्नोहंतवांतिकम् ॥ ज्ञानतोज्ञानतोवापियन्न्यूनंयत्कृ
तंमया ॥ तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादात्क्षमस्वमे इति ॥ गुरुरपि ॥ समस्तजगदुत्पत्तिस्थितिसंहारकारकः ॥ शिवःसानुचरस्ताद्धः
सर्वदासर्वकामदः ॥ द्रव्यहीनंतुयत्किंचिद्विधिहीनंतुयद्भवेत् ॥ तत्सर्वंपूर्णमेवास्तुप्रसादात्कारणस्यतु ॥ मूर्तिपानांस्थापकस्यवार्णि
नांशिल्पिनांतथा ॥ सराष्ट्रपार्थिवानांचशांतिर्भवतुसर्वदा ॥ भृत्यपुत्रकलत्रैश्चस्वमित्रबलवाहनैः ॥ कारणस्यप्रसादेनसर्वलोकेभश्श्रेयुत्वव
क्त्वायजमानायाशिषंदद्यात् ॥ ततःस्थापकमूर्तिपजापिनःऋत्विक्स्थपतिदैवज्ञान्संपूज्यतेभ्यःशक्तितोदक्षिणांदद्यात् । अधिवासनंतुसद्योवा
बहुकालसाध्यंवा । तत्रसद्यःपक्षेवक्ष्यमाणमधुकुंकुमादिसर्वद्रव्यैस्तद्दिनएवदेवंलेपयेत् ॥ अंत्येतुप्रथमेहनिकुंकुमेनदेवंलेपयित्वापूजयेत् ॥
द्वितीयदिनेहरिद्रासिद्धार्थकचूर्णेन ॥ एवंतृतीयदिनेपिष्टसितचंदनयवचूर्णेन ॥ चतुर्थेमनःशिलाप्रियंगुचूर्णेन ॥ पंचमेकृष्णांजनतिल
चूर्णेन ॥ षष्ठेरक्तचंदनपद्मकेसरचूर्णेन ॥ सप्तमेगोरोचनानागकेसरचूर्णेन ॥ सर्वलेपद्रव्येषुकापिलाघृतमिश्रणंज्ञेयम् ॥ प्रतिमानांले
पत्रयंदिनत्रयंक्रमेणकृत्त्वा शेषलेपांश्चतुर्थदिनेयुगपत्कृत्वात्रिसंध्यंबलिदानंचानिर्वर्त्यप्रतिकुंडेहवनंसंपादयेत् ॥ शांतिहोमंचऋत्विजःकुर्युरि
त्यनेकदिननिर्वर्त्यैऽधिवासनेज्ञेयम् ॥ शिवस्यतुयदाप्रतिष्ठोत्तरकालंसप्तसुदिनेषुमधुकुंकुमादिलेपाःक्रियंतेतदाष्टमदिनेस्नपनार्चनादिर्महा

नुत्सवोविधेयः ॥ इतिसर्वदेवप्रतिष्ठाविधिः ॥ अथचतुर्थीकर्म ॥ तच्चतुर्थेदिनेद्वितीयेवाकुर्यात् ॥ अमुकलिंगप्रतिष्ठांगतयाचतुर्थीकर्म करिष्येइतिसंकल्प्य तत्रप्राग्वृतएवाचार्योमूर्तिपयजमानद्वारपालादिभिःसह्मंडपंपश्चिमद्वारेणप्रविश्यतत्रमहास्नानसंभारादिकमुपकल्प्य वेद्याःप्रादक्षिण्येनगत्वाकुंडेस्थापितदैवत्यंचरुंश्रपयित्वा पंचब्रह्मभिरंगसहितैः सहस्राहुतिहोमंकुर्यात् ॥ ब्रह्ममंत्रायथा—ईशानःसर्ववि० तत्पुरुषायवि० अघोरेभ्योथ० वामदेवायनमो० सद्योजातंप्र० इतिप्रागुक्ताः । अंगमंत्राअपि । अद्भ्यःसंभूतःपृथिव्यैरसाच्च० विश्वकर्मणःसमव० तस्यत्वष्टा० तत्पुरुषस्य० वेदाहमेतं० आदित्यवर्णंतमसः परस्तात्० तमेवंविद्वा० नान्यः पन्थावि० प्रजापतिश्चरति० अजायमानो० तस्यधीराःप० मरीचीनांपद० योदेवेभ्यआ० योदेवानां० पूर्वोयोदेवेभ्यो० नमोरुचाय० रुचंब्राह्ममि त्यादि ॥ ततऋत्विजोघृतेनतिलैर्वास्वस्वंकुंडेषु[१]शतंशतंहुत्वागौरीर्मिमायेतिमंत्रेणचजुहुयुः॥ इतिशिवस्यचतुर्थीकर्म ॥ एवमन्यदेवविषयेपि पूर्ववत्स्थापितदैवत्यंचरुंश्रपयित्वास्वमंत्रैःपत्नीमंत्रैश्चसहस्रहोमंकुर्यात् ॥ ऋत्विजोपिघृतेनशतंशतंप्रतिकुंडंहुत्वापूर्णाहुतिंजुहुयुः । गुरुश्च शीतलतोयेनमूर्तिंसिक्त्वानिर्माल्यमपसार्यपुनःपूजयित्वाएकाशीतिघटान्पूर्ववत्संस्थाप्यस्नापयेदिति । यद्वापुराणांतरोक्तप्रकारेणपूजयेत् ॥ तत्रदध्यक्षतकुशाग्रक्षीरदूर्वामधुयवसिद्धार्थकपुष्पफलतोयान्वितमर्घ्यपात्रमासाद्यकलशाष्टसहस्रमष्टशतमष्टौचतुरोवाकलशान्सौवर्णान्राजता न्ताम्रान्श्रीतिकमयान्मृन्मयान्वोपकल्प्यतेषुशन्नोदेवीरापोहिष्ठेतिमंत्रैरुद्धृतंतीर्थजलंप्रक्षिप्यमृद्गोमयक्षीरदधिमधुघृतशर्करौषधिपुष्पफलकुशरत्न गंधपंचगव्यादिकंचततः समुद्रंवःप्रहिणोमीतिमंत्रेणदेवायार्घ्यंसमर्प्यस्नापयेत् । तद्यथा । पंचनद्यइतिपंचगव्येन । दधिक्राव्णइ

१ शिवादिकुण्डेषु ।

तिदध्ना । आप्यायस्वेतिक्षीरेण । तेजोसीतिघृतेन । मधुवाताइतिमधुना । देवस्यत्वा० सरस्वत्यैभैषज्येनेति पुष्पोदकेन । परिवाजपतिःकविः० रत्नोदकेन । देवस्यत्वेतिकुशोदकेन । अग्नआयाहीतिफलोदकेन । गायत्र्यागंधोदकेन । ओषधीःप्रतिमोदध्वमितिसहदेवीव्याघ्रीबलाऽतिबलाशंखपुष्पीवचासिंहीसुवर्चलोदकेन । समुद्रज्येष्ठाइतिपूर्वकल्पितशीतलजलेन ॥ वसोःपवित्रमितिसहस्रधाराकुंभेन । ततस्तूष्णींस्नपनम् ॥ ततअधस्थांधोवोइतिपंचवर्णसूत्रेणनीराज्यबलिंहरेत् ॥ मुंचंतुमाशपथ्यादितिकौतुकंविमुच्यसुगंधवस्त्रेणपंचनद्यइतिदेवंपरिमार्ष्टि ॥ मंदाकिन्यास्तुयद्वारिसर्वपापहरंशुभम् । तदिदंकल्पितंदेवसम्यगाचम्यतांत्वयेत्याचमनीयंनिवेदयेत् ॥ वेदसूक्तसमायुक्तेयज्ञसामसमन्विते ॥ सर्ववर्णप्रदेदेववाससीतेविनिर्मिते ॥ इतिवस्त्रयुग्मम् ॥ शरीरंतेनजानामिचेष्टांनैवचनैवच ॥ मयानिवेदितंभक्त्याचंदनंप्रतिगृह्यतामिति ॥ कुंकुमकर्पूरयुक्तचंदनम् ॥ मणिमुक्ताप्रवालाद्यैःस्वर्णपुष्पैर्मयाकृता । पूजातुदेवदेवेशप्रसादाद्भवतस्तवेतिपुष्पम् ॥ वनस्पतिरसोदिव्योगंधाढ्यःसुमनोहरः॥ आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतामितिधूपः॥ त्वंचंद्रस्त्वंरविर्विष्णुस्त्वंरत्नानिहुताशन ॥ त्वमेवसर्वज्योतींषिदीपोयंप्रतिगृह्यतामित्यशीत्याचत्वारिंशतावादीपैरारार्तिकम्॥अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितम् ॥ भक्ष्यभोज्यसमायुक्तंतद्गृहाणानुकंपया॥मंत्रहीनंक्रियाहीनंभक्तिहीनंजनार्दन॥यत्पूजितंमयादेवपरिपूर्णंतदस्तुमेइतिसंप्रार्थ्य पुनरष्टोत्तरसहस्रंमूलमंत्रेणहुत्वांगानांदशांशेनपूर्णाहुत्यंतंकृत्वा स्वस्तिवाचनंकारयित्वाइन्द्रादिभ्योबलिंदत्त्वाऽऽचम्यशेषंसमापयेदिति॥ इतिचतुर्थीकर्मविधिः॥अथशैवेचंडपुजा ॥ चतुर्थीकर्मदिनेदिनांतरेवाऽमुकलिंगप्रतिष्ठांगतयाचंडप्रतिष्ठांकरिष्ये इतिसंकल्प्यप्रासादाद्बहिर्गर्भगृहार्द्धसूत्रांतरालेईशान्यांचंडस्थानेपीठादौचंडमूर्तिंसंस्थाप्यपूजयेत्॥तत्रध्यानम् ॥ रुद्राग्नेःप्रभवंचंडंकज्जलाभंभयानकम् ॥ शूलदंडधरंरौद्रंचतुर्वक्त्रंचतुर्भुजम् ॥ मुखोद्गीर्णमहाज्वालं

रक्तद्वादशलोचनम् ॥ जटामुकुटखंडेन्दुमंडितंफणिकंकणम् ॥ व्यालयज्ञोपवीतंचसाक्षसूत्रकमंडलुम् ॥ श्वेतपद्मासनासीनंभक्तिप्रह्वार्तिनाशनम् ॥
इतिध्यात्वा—ॐचंडासनायनमः। चंडमूर्तयेनमः। धुनिचंडेश्वरायहूंफट्स्वाहेतिमंत्रेणावाह्यॐचंडहृदयायहुंफट्नमः॥ॐचंडाशिरसेहुंफट्नमः।
ॐचंडशिखायैहुंफट्नमः। ॐचंडकवचायहुंफट्नमः । ॐचंडास्त्रायहुंफट्करयोरस्त्रम् । ॐचंसद्योजातायहुंफट्नमः ॐचिंवामदेवायहुं
फट्नमः। ॐचुंअघोरायहुंफट्नमः। ॐचेंतत्पुरुषायहुंफट्नमः ॥ ॐचोंईशानायहुंफट्नमः ॥ इतिन्यासान्कृत्वाषोडशोपचारैःसंपूज्य
विज्ञापयेत् ॥ यावत्तिष्ठतिलोकेस्मिन्देवदेवोमहेश्वरः ॥ तावत्कालंत्वयादेवस्थातव्यंशिवसन्निधाविति ॥ ततोदिग्बलिंदत्त्वाभूतानिविज्ञाप
येत् ॥ यावत्कालंमहादेवोलिंगमाश्रित्यतिष्ठति ॥ तावत्कालंतुरक्षार्थंयूयंतिष्ठतसर्वदेति ॥ ततोगुरुःकर्मशेषंसंपाद्यभद्रासनेयजमानमुप
वेश्याभिषिंचेत् ॥ तत्रदेवस्यत्वेति शन्नोदेवीरभिष्टये० अथर्वणसाम । सुरास्त्वामभिषिंचंत्वित्यादयश्चमंत्राः ॥ ततोयजमानोमहाजलाशये
अवभृथस्नानंकृत्वामंडपमागत्यगुर्वादीन्संपूज्याहिरण्यादिदक्षिणांदत्त्वासोपस्करांगांचदद्यात् । गुरुश्च—समस्तजगदुत्पतिस्थित्यनुग्रह
कारकः ॥ शिवःसानुचरःस्ताद्वःसर्वदासर्वकामदः—इतिमंत्रेणाशिषोदद्यात् ॥ यथाशक्तिब्राह्मणभोजनम् ॥ क्वचिच्चंडोनास्तीतित्रिविक्रमः ॥
बाणलिंगेचलोहेचसिद्धलिंगेस्वयंभुवि । प्रतिमासुचसर्वासुनचंडोधिकृतोभवेदिति ॥ इतिचंडपूजा ॥ अथचलप्रतिष्ठाबोधायनाद्युक्ता
तत्रशुचौदेशेमंडपंतदंतःप्रतीच्यामुदीच्यामीशान्यांवाकुंडंकुर्यात् ॥ मंडपाकरणपक्षेकुंडस्थानेस्थंडिलंकुर्यात् । तदुत्तरतःस्नानवेदिस्नानोपक
रणानिनैर्ऋतेवास्तुमंडलंमध्येवेद्यांसर्वतोभद्रादिमंडलंविष्णुप्रतिष्ठायांसर्वतोभद्रंशिवप्रतिष्ठायांलिंगतोभद्रं तदुत्तरतःस्वस्तिकोपरिशय्यास्थानं
चकृत्वापूर्वदिनेप्रतिष्ठादिनेवादेशकालौस्मृत्वादाहादिदोषदुष्टायामस्यांमूर्तौपुनर्देवकलासान्निध्यार्थमायुःश्रीसर्वफलायुष्मत्सुपुत्रावाप्त्यादिसु

स्वकामईश्वरप्रीतिकामोवापारिवारदेवतोपेतामुकमूर्तेश्चलप्रतिष्ठांकरिष्यतेइतिसंकल्प्य तदंगत्वेनगणेशपूजापुण्याहवाचनमातृपूजनाभ्युदयिक
श्राद्धानिकृत्वागुरुमष्टौचतुरोवाऽऽर्त्विजश्चकृत्वापूजयेत् ॥ ततोमंडपकरणपक्षेगुरुर्मंडपप्रतिष्ठामग्निस्थापनंचकृत्वाऽत्रग्रहस्थापनं केचिदिच्छं
ति । स्थाप्यदैवत्यंनैवारंचरुंश्रपयित्वाऽऽज्यभागांतेपलाशोदुंबराश्वत्थापामार्गसमिधां प्रत्येकमष्टसहस्रमष्टशतमष्टाविंशतिमष्टौवाप्रति
दैवतंलोकपालमंत्रैर्व्याहृतिभिर्वाजुहुयात् ॥ तावत्संख्याकमाज्यहोमंकृत्वास्थाप्यदेवताकमंत्रेणसमित्तिलाज्यानांप्रतिद्रव्यंदशदशाहुतीः
स्विष्टकृतंचहुत्वाऽष्टसहस्रमष्टशतंवास्थाप्यदेवतामंत्रंजपेत् ॥ अथयजमानोगुरवेवरंदद्यात् ॥ ततोगुरुर्देवंपंचगव्यैःपंचामृतैश्चपृथक्तत्तन्मन्त्रैः
शन्नोदेवीरितिसंस्रावकलशेनचसंस्राव्य श्रीखंडाद्यैरनुलिप्योष्णोदकेनप्रक्षाल्यपुनश्चतुर्भिः कलशैःसमुद्रज्येष्ठाइत्याद्यभिषेकमंत्रैरभिषिच्य
भद्रपीठेनिवेश्यतत्रपरितोष्टौकलशान्तोयपूर्णान्पूर्वादिक्रमेणसंस्थाप्यसप्तमृदःपल्लवान्कुशाञ्च्छाल्युदकंप्रस्रवणोदकंयवान्पुष्पाणिफलानिचक्र
मेणनिःक्षिप्यस्थापनक्रमेणकुंभैःस्नापयेत् । तत्तन्मंत्राः—आपोहिष्ठेतितृचःहिरण्यवर्णाःशुचयइतिचतुष्टयंपवमानःसुवर्चनइत्यनुवाकश्चेति ॥
ततोवाससीपरिधाप्यउपवीतंदत्त्वागंधपुष्पधूपदीपैःसंपूज्यपैष्टैरष्टभिर्दीपैर्नीराज्यहिरण्यगर्भइत्यष्टभिर्हिरण्यशलाकांगृहीत्वा चित्रंदेवानामित्य
र्धर्चेनदेवनेत्रेउन्मील्यांजंतित्वामध्वरइत्यंजयित्वापुनर्मधुघृतशर्कराभिर्देवस्यत्वेत्यंजयेत् ॥ मंत्रांतेअनज्मीतिवाक्यशेषः ॥ ततोभक्ष्यभो
ज्यादर्शादिदर्शयेत् । तदाग्रेकोपिनातिष्ठेत् । ततोदर्भेष्वासीनोदर्भान्धारयमाणः पुरुषसूक्तेनस्तुत्वावंशपात्रेपंचवर्णान्वितमन्नंप्रक्षिप्यदेवं
नीराज्य—ॐ नमोभूतादिपतयेदीप्तशूलधरायोमापतयेसर्वविद्याधिपतयेरुद्रायनमःशिवमगर्हितंकर्मास्तुस्वाहेतिबलिंदत्त्वाचामेत् ॥ ततो
ब्रह्माद्याःसर्वतोभद्रमंडलदेवताआवाह्यगंधादिनासंपूज्यस्थाप्यदेवंतत्तल्लिंगमंत्रैरावाह्यकर्णिकायांप्रतिष्ठाप्यगंधाद्यैःसंपूज्यकुंडेमंडलेदेवतानांना

ममंत्रैर्दशदशतिलाहुतीर्हुत्वाशय्यायांदेवमारोप्यपुरुषसूक्तोत्तरनारायणाभ्यांब्राह्मणैःसहोपतिष्ठेत् ॥ ततोदेवेपुरुषात्मनेनमःप्राणात्मने ।
इतिशरीरेव्यापकंन्यसेत् । प्रकृतितत्वाय । बुद्धितत्वाय । अहंकारतत्वाय । मनस्तत्वायेति हृदि । शब्दतत्वायेतिशिरसि ।
स्पर्शतत्वायेतित्वचि । रूपतत्वायेतिहृदि । रसतत्वायेतिवस्तौ । गंधतत्वायेतिपादयोः । श्रोत्रतत्वायेतिकर्णयोः । त्वक्तत्वायेतिसर्वे
शरीरे । चक्षुस्तत्वायेतिचक्षुषोः । जिह्वातत्वायेति जिह्वायाम् । घ्राणतत्वायेतिघ्राणे । वाक्तत्वायेतिवाचि । पाणितत्वायेतिपाण्योः । पादतत्वा
तिपादयोः । पायुतत्वायेतिपायौ । उपस्थतत्वायेत्युपस्थे । पृथ्वीतत्वायेतिपादयोः । अप्तत्वायेति वस्तौ । तेजस्तत्वायेतिहृदि
वायुतत्वायेति घ्राणे । आकाशतत्वायेतिशिरसि । रजस्तत्वाय । तमस्तत्वाय । सत्वतत्वाय । देहतत्वायेतिदेहे ॥ ततःपुरुषसूक्तन्यासंकृ
त्वासंपूज्याधिवासयेत् ॥ ततोमंडलशय्ययोर्मध्येनगंतव्यंमंडलदेवतानामुपहारनिवेदनम् । तत्रसर्वान्नंब्रह्मणे । घृतान्नंसोदकमिंद्राय । आज्य
न्नमग्नये । माषान्नंयमाय । कृष्णव्रीह्यन्नंसघृतंनिर्ऋतये । नवनीतोदनंवरुणाय । यवोदनंवायवे । प्रैयंगवंसोमाय । गवेधुकमीशानाय । पाय
संसर्वेभ्यः । ततःशय्याप्रदेशेनैवारंचरुंस्थापयित्वातेनदिग्बलिंदत्वानिशांनयेत्॥इत्यधिवासनम् ॥प्रातःपुरोदयाद्देवमुत्थाप्यमूलमंत्रेणोपस्था
यघृतेनचरुंश्रपयित्वाभिघार्यमूलमंत्रेणाष्टोत्तरसहस्रमष्टशतंवाहुत्वाघृंततावद्धुत्वाचरुशेषेण—अग्नयेस्वाहा । सोमायस्वाहा । धन्वंतरये
स्वाहा ॥ कुह्वै० । अनुमत्यैस्वाहा । प्रजापतयेस्वाहा । परमेष्ठिने० । ब्रह्मणे० । अग्नयेस्वाहा । सोमायस्वाहा । अग्नयेन्नादाय० । अग्नये
न्नपतये । प्रजापतये । विश्वेभ्योदेवेभ्यः । सर्वेभ्योदेवेभ्यः । सर्वेभ्योभूतेभ्यः । भूर्भुवःस्वःस्वाहा ॥ अग्नयेस्विष्टकृतेस्वाहेतिजुहुयात् ।
ततोयजमानोगुरवेवरंदद्यात् ॥ ततउदितेसूर्येगुरुर्वेद्यामेवाभिमुखंदेवंकृत्वारत्नपुष्पमूलफलौषध्यादिदर्शयित्वाताम्रपात्रेशांतिजलमादाय

मूलमंत्रेणशतवारमभिमंत्र्यदेवशिरसितेनैवमंत्रेणासिच्योत्तिष्ठब्रह्मणस्पतइत्युत्थाप्यविश्वतश्चक्षुरित्युपस्थायदेवस्यपुरस्तात् । ॐब्रह्मविष्णु रुद्रेभ्यो०दिक्पालेभ्यो०वसुभ्यो० रुद्रेभ्यो० आदित्येभ्यो० अश्विभ्यो० मरुद्भ्यो० कुबेराय०गंगादिमहानदीभ्यो०अग्नीषोमाभ्यां० इन्द्राग्निभ्यो०द्यावापृथिवीभ्यां० धन्वंतरये०सर्वेशाय० विश्वेभ्योदेवेभ्यो० ब्रह्मणेनमः—इतिजपित्वा प्राणप्रतिष्ठांकुर्यात् ॥ देवस्य पुरतोयजमानमभिषिच्य देवमंत्रंजपित्वा ध्रुवसूक्तेनतल्लिंगमंत्रेणपुरुषसूक्तेनगायत्र्याव्याहृतिभिश्चदेवंप्रतिष्ठाप्य प्रतिमायांनिजवाहनायुधप रिवारादिकंध्यात्वापुनःपूजयित्वामुद्रांप्रदर्श्यमूलमंत्रमष्टोत्तरशतंजपित्वास्तुत्वानत्वाचम्यास्विष्टकृदाद्युत्तरांगानिसमापयेत् ॥ ततोयजमानो दक्षिणांदद्याद्विप्रांश्चभोजयेच्चयथाशक्ति॥इतिचलार्चाप्रतिष्ठा॥ अथजीर्णोद्धारविधिः॥अग्निपुराणे॥ जीर्णादीनांचलिंगानामुद्धारविधिमाचरेत्॥ लक्ष्मोज्झितंचभग्नंचस्थूलंवज्रहतंतथा ॥ संपुटंस्फुटितंव्यंगंलिंगमित्येवमादिकम्॥ इत्यादिदुष्टलिंगानांत्याज्यापिंडीतथावृषः॥लक्ष्मोज्झितं बाणादिभ्रमेणताद्विधिनास्थापितंसत्तल्लक्षणरहितम् ॥ भग्नमनेकशकलीभूतंस्थूलापिंडिकाननुरूपम् ॥ वज्रहतंविद्युद्धतम्॥ संपुटंन्युब्जम्॥स्फु टितमेकदेशेभग्नम्॥व्यंगंपिंडिकाप्रणाल्यादिरहितम्॥आदिपदेनचांडालस्पृष्टादीनांग्रहणं॥ पिंडीवृषयोर्दुष्टत्वेतयोरेवत्यागोनलिंगस्य। चलितं चलितंनिम्नमत्यर्थंविषमस्थितम् ॥ दिङ्मूढंपातितंलिंगंमध्यस्थंपतितंतथा ॥ एवंविधंचसंस्थाप्यंनिर्व्रणंचभवेद्यदि। नादेयनप्रवाहेणतदपाक्रियते यदि ॥ ततोन्यत्रापिसंस्थाप्यंविधिदृष्टेनकर्मणेति ॥ निम्नंसामंतभूभागान्निम्नायांभुव्यवस्थितम् ॥ विषमस्थितंयत्रपूजादिकर्तुंनशक्यतेतस्मि न्देशेव्यवस्थितम् ॥ दिङ्मूढंविशेषविध्यभावेपिउदगतिरिक्तदिक्प्रणालीकम् । पातितंगर्तादौ । मध्यस्थंसंपूर्णपिंडिकाश्वभ्रंतर्गतंप्रासादमध्य भागेस्थितमित्यपिकेचित् ॥ एवंविधमित्यनेनलक्ष्मोज्झितभग्नस्फुटितविद्युद्धतातिरिक्तानांग्रहणम् ॥ तेनजघन्योनिर्व्रणशब्दोपिलक्ष्मो

ज्झिताद्यतिरिक्तानामेवोपलक्षकः । पीठाच्चचालितंलिंगंनिर्दोषंतुभवेद्यदि । ततोवैस्थापयेत्तत्रजपेल्लक्षमघोरकम् ॥ त्यजेत्सदोषितंलिंगं
श्वपचाद्यैश्चसेवितम् ॥ लिंगांतरंप्रतिष्ठाप्याविशुद्धिमधिगच्छतीतिसिद्धांतशेखरोक्तेः ॥ तत्रैव--लिंगादीनांचजीर्णानांप्रोच्यतेविधिरुच्छ्रि
तौ ॥ सर्वारिष्टविनाशार्थंसर्वप्राणिहितार्थकः ॥ लिंगस्यपिंडिकायाश्चप्रतिमामुखलिंगयोः ॥ सर्वेषांपरिवाराणांहर्म्यप्राकारयोस्तथा ॥
उद्धारश्चावृतिः प्रोक्ताथोद्धारेहेतुरुच्यते ॥ आवृतिःपुनःसंस्कारः ॥ स्फुटितेखंडितेभग्नेदग्धेवाशनिनाग्निना ॥ उन्मत्तैःशत्रुभिश्चौरैःक
रिणास्रोतसाहृते । लिंगेपीठादिकेवापिविशीर्णेकालपर्ययात् ॥ देहंजीर्णंयथादेहीत्यक्त्वान्यदुपगच्छति ॥ लिंगादीन्यतिजीर्णानितथामुंचं
तिदेवताः ॥ खंडितंचूर्णितंलिंगंप्रेताद्याआश्रयंतिच ॥ लिंगाद्यंसत्त्वशून्यत्वात्तथाचब्रह्मराक्षसाः ॥ कर्तुर्नृपाणांराष्ट्रस्यतद्ग्रामस्यविशे
षतः । पीडांकुर्वंतितेह्युग्रांदुर्भिक्षंमरणादिकम् ॥ तस्मात्सर्वप्रयत्नेनकुर्यादुद्धरणक्रियाम् ॥ स्वायंभुवेचदैवेचबाणलिंगेतथैवच ॥
ऋषिभिश्चासुरैर्देवैस्तत्त्वविद्भिःप्रतिष्ठिते ॥ लिंगेजीर्णादिदुष्टेपिनोद्धारंतत्रकारयेत् ॥ इदमपिस्वयंभ्वादिव्यक्तिविषयम्—नतुदैवात्त
द्व्यक्तिनाशेनतत्स्थानस्थापितेदानींतनतादृशव्यक्तिविषयम् ॥ स्वयंभ्वादिलिंगानां जीर्णपीठंपरित्यजेत् ॥ उक्तैर्जीर्णादिभिर्दुष्टंमानुषंतुप
रित्यजेत् ॥ दिङ्मूढंपतितंस्थानान्मध्यस्थंस्रोतसाहृतम् ॥ चौराद्यैश्चालितंलिंगंस्थापयेन्निर्व्रणंपुनः। लोहाद्यंछिन्नभिन्नांगंसंधायस्थापयेत्पुनः ॥
सुवर्णाद्यष्टलोहनिर्मितंलिंगं दैवाद्ध्वंसत्तदेवसज्जंकृत्वापुनःस्थापयेदित्यर्थः ॥ बाहुपादशिरोहीनांकर्णनासास्यहीनकाम् ॥ तादृशींपरिवा
राणांप्रतिमांपरिवर्जयेत् ॥ यद्द्रव्यंयत्प्रमाणंचलिंगंवाप्रतिमापिवा ॥ तादृक्तेनैवमानेनतद्द्रव्येणप्रकल्पयेत् ॥ कारयेन्नान्यमानेननान्यद्र
व्येणतत्पुनः ॥ नान्याकारंचनान्यत्रस्थापयेत्तद्गुरूत्तमः ॥ स्रोतसापहृतेलिंगेप्रासादेवातदन्यतः ॥ तत्समीपगतेदेशेस्थापयेद्बाधवर्जिते ॥

प्रासादेपतितेहर्म्येगोपुरेमंडपादिके ॥ तदाकारंचतद्द्रव्यैस्तन्मानंतत्रकारयेत् ॥ कर्मयोग्याशिलाग्राह्याहढकाश्चतथाविधाः ॥ हीनद्र
व्यकृतंहर्म्यंश्रेष्ठैर्द्रव्यैःसमाचरेत् ॥ हीनंवाप्यधिकंमानमाकारंवानकारयेत् ॥ एवमुक्तेनमार्गेणदोषैरुक्तैर्विचार्यच ॥ लिंगपीठादिकंजी
र्णंतदुद्धारंतथाचरेत् ॥ तिथिनक्षत्रवारादितदर्थंनविचारयेत् ॥ जीर्णंचोद्धारयेद्विद्वान्नजीर्णंनैवचालयेत् ॥ जीर्णस्यधारणेदोषाअजीर्ण
चलनेतथा ॥ तस्मान्नधारयेज्जीर्णमजीर्णंरक्षयेद्बुधः ॥ सुस्थितंदुःस्थितंवापिशिवलिंगंनचालयेत् ॥ शतेनस्थापनंकुर्यात्सहस्रेणतुचाल
नम् ॥ अस्यश्लोकस्यवाक्यार्थोवर्ण्यतेऽथयथागमम् ॥ नित्यंपूजादिभिर्युक्तंजीर्णाद्यमपिसुस्थितम् ॥ हीनंपूजादिभिर्लिंगमजीर्ण
मपिदुःस्थितम् ॥ देवतास्थापितंलिंगंमोहान्निम्नत्वमागतम् ॥ तल्लिंगंदुःस्थितंवापितंत्रज्ञैरितिनिश्चितम् ॥ सहस्राधिकहोमेनतस्यचा
लनमीरितम् ॥ स्थापनंशतहोमेनतस्यलिंगस्यचोदितम् ॥ एवंबहुविधैस्तंत्रैर्दोषाश्चबहुधोदिताः ॥ परीक्ष्यबहुधातांश्चजीर्णलिंगं
समुद्धरेत् ॥ हयशीर्षागमेपि ॥ जीर्णोद्धारविधिंकृत्स्नंसंक्षेपात्प्रब्रवीमिते ॥ चालितोत्पाटिताभूमिःकेनचित्पापकर्मणा ॥ चंडाल
वत्यसंस्पर्शेदूषितावह्निनाचया ॥ स्वयमापतिताजीर्णानदीवेगादिपातिता ॥ अपुण्यजलसंस्पृष्टाविप्रक्षतजदूषिता ॥ पतिताद्य
र्चिताश्लेष्मविण्मूत्रादिविदूषिता ॥ सव्रणालक्षणोपेतासंस्कार्यादेशिकेनतु ॥ भूमिर्लिंगमीश्वरप्रतिमाच ॥ चंडालवतीतत्स्पृष्टा ॥ असं
स्पर्शोनिषिद्धस्पर्शः ॥ जीर्णाकालबाहुल्येनक्षारादिसंबंधेनैवविशीर्णा ॥ सव्रणाएकदेशेभग्ना ॥ देशिकउपासकः । पूर्वोक्तेनविधा
नेनवैदिकेनसुरोत्तम ॥ अचलांदूषितामेवंस्थापयेद्विधिनोद्धृताम् ॥ पूर्वोक्तेनचलार्चाप्रतिष्ठाप्रकारेण ॥ एवंविधिनोद्धृतापीत्यन्वयः ॥
वक्ष्यमाणप्रकारेणोद्धृतामित्यर्थः ॥ पूर्वपीठंपरित्यज्ययदन्यदपितद्गतम् ॥ ततोयथोक्तविधिनाप्रासादेसन्निवेशयेत् ॥ दुष्टंपूर्वासनंपरित्य

ज्यान्यस्मिंस्तत्प्रासादगतआसनेयथोक्तेनचलार्चास्थापनप्रकारेणपुनःस्थापयेदित्यर्थः ॥ अतिजीर्णांतथाव्यंगांदारवींशैलजामपि ॥ परि
त्यज्यन्यसेदन्यांपूर्वोक्तविधिनागुरुः ॥ संहारविधिनातत्रमंत्रान्संहृत्यदेशिकः ॥ सहस्रंनारसिंहेनहुत्वातामुद्धरेद्गुरुः ॥ संहारविधिनाप्रातिलो
म्येन ॥ मंत्रान्कलाः ॥ संहृत्योद्धृत्य ॥ नारसिंहेननृसिंहमंत्रेण ॥ होमद्रव्यमाज्यमन्यानादेशात् ॥ वृषंसंयोजयित्वातुमंत्रेणोद्वाह्यदेशिकः ॥
दार्वींचदाहयेद्वह्नौशैलजांप्रक्षिपेज्जले ॥ धातुजांरत्नजांवापिप्रक्षिपेन्मकरालये ॥ अगाधेचान्यतोयेचक्षिपेन्नद्यांमहाजले ॥ वृषंवृषौवार
ज्ज्वासंयोज्यमंत्रेणपाशुपतेनोद्वाहयेदितित्रिविक्रमः । यानमारोप्यजीर्णार्चांछाद्यवस्त्रादिनागुरुः ॥ शंखदुन्दुभिनिर्घोषैर्गीतवादित्रनिःस्वनैः ॥
नीत्वागाधंजलंरम्यंभागीरथ्यामथार्णवे ॥ विष्वक्सेनायवीर्येणप्रक्षिपेत्तांततोगुरुः ॥ यानमारोप्येत्यादिपूर्वोक्तेनैवप्रतिपादनमितिकर्तव्यतो
त्त्यर्थम् ॥ विष्वक्सेनोद्देशेनवीर्येणबीजेनगुरुर्भागीरथ्यादिजलेतांप्रतिमांक्षिपेदित्यर्थः ॥ रत्नानिक्षिप्तान्यादायस्वयंदद्यात्तुदक्षिणाम् ॥
धेनवोदशवापंचस्वर्णवस्त्राद्यलंकृताः ॥ जीर्णोद्धारेप्रदातव्यागुरवेविष्णुतुष्टये ॥ लिंगगर्तेक्षिप्तानिरत्नान्यादायस्वयंयजमानोदशधेनूःपंच
वाहेमवस्त्राद्यलंकृतागुरवेदक्षिणांदद्यादित्यर्थः ॥ भोजनीयाविष्णुभक्तादेयमन्नमवारितम् ॥ त्रिरात्रमुत्सवःकार्यःपंचसप्ताथवापिवा ॥
न लिंगश्चाविधिनादेयायथोक्तेनसुरोत्तम ॥ यथोक्तेनचलार्चाप्रतिष्ठोक्तप्रकारेण । ततोनिवेदयेदन्यांप्रतिमांलक्षणान्विताम् । निवेदयेत्स्था
पयेत् ॥ तत्क्षणादेवराजेंद्रतस्यदोषस्यशांतये ॥ संपत्तिर्वाविपत्तिर्वानोपेक्षांतत्रकारयेत् ॥ अपास्यापिंडिकांपूर्वामन्यांतत्रनिवेशयेत् ॥
यद्द्रव्यायत्प्रमाणाचयामूर्तिश्चोद्धृताहरेः ॥ तद्द्रव्याततत्प्रमाणाचसामूर्तिस्तत्रकीर्तिता ॥ यत्प्रमाणंयदाकारंयन्मयंविंबमुद्धरेत् ॥ तत्प्रमा
णंतदाकारंतन्मानंतत्रविन्यसेत् ॥ विहायपिंडिकांपूर्वांतद्दिनेचापरांन्यसेत् ॥ द्वितीयेवातृतीयेवादिवसेस्थापयेद्धरिम् ॥ अतऊर्ध्वंभवेद्दोषोविधि

नापिनिवेशिते ॥ अनेनैवविधानेनलेख्यादींस्तुविवर्जयेत् ॥ लेख्यादीन्कुड्यलिखिताःप्रतिष्ठापिताःप्रतिमाः ॥ अन्यद्विकल्पयेत्तत्रतत्प्रमाणं तदाकृतिम् ॥ एषसंक्षेपतःप्रोक्तोजीर्णोद्धारविधिस्तव ॥ सर्वेषामेवदेवानामेषसाधारणःस्मृतः ॥ योजीर्णंविधिनाबिंबंसंस्कुर्यान्मानवोभुवि ॥ फलंदशगुणंतस्यमूलान्नास्त्यत्रसंशयः ॥ वापीकूपतडागानांसुरधाम्नांसदानघः ॥ प्रतिमानांसभानांचसंस्कर्तायोनरोभुवि ॥ पुण्यंशतगुणं तस्यभवेन्मूलान्नसंशयः ॥ संशयोत्रनकर्तव्योजीर्णसंस्कारकर्मणि ॥ मूलाद्दशगुणंप्रोक्तंपुण्यंकूपेप्रतिष्ठितम् ॥ प्रतिष्ठितमितिभावेक्तः ॥ प्रतिमायांशतगुणंकूपादेःपरिकीर्तितम् ॥ प्रतिमादौदशगुणंजीर्णसंस्कारणाद्भवेत् ॥ कूपप्रतिमयोर्दशगुणशतगुणयोरल्पत्वमहत्त्वापेक्षया व्यवस्था ॥ अग्निपुराणे ॥ सुस्थितंदुःस्थितंवापिशिवलिंगंनचालयेत् ॥ शतेनस्थापनंकुर्यात्सहस्रेणतुचालनम् ॥ पूजादिभिश्चसंयुक्तं जीर्णाद्यमपिसुस्थितम् ॥ पूजयारहितंयत्तदद्दुष्टमपिदुःस्थितम् ॥ अयंचचालननिषेधोविधिव्यतिरेकेणशतसहस्रसंख्येऽनुक्तसंख्येयत्वा द्वोगते ॥ मौश्वश्वश्वेत्यत्रैव ॥ बहूपकारित्वाद्यःसहस्रंशताश्वमित्यादौबाहुल्येनदर्शनाच्चेतिन्यायविदः ॥ सिद्धांतशेखरेतु–होमगतेयंसंख्ये त्युक्तंयदपितत्रैव–असुरैर्मुनिभिर्देवैस्तत्त्वविद्भिःप्रतिष्ठितम् ॥ जीर्णंवाप्यथवाभग्नंविधिनापिनचालयेदिति तदसुरादिप्रतिष्ठापिततद्व्य क्तिविषयम्–नतुदैवात्तद्व्यक्तिनाशेनतत्स्थानस्थापितेदानींतनताद्दशव्यक्तिविषयम् ॥ जीर्णोद्धारप्रकारोप्यत्रैव ॥ याम्येमंडपमीशे वाप्रत्यग्द्वारैकतोरणम् ॥ विधायद्वारपूजादिस्थंडिलेसंप्रपूजनम् ॥ द्वारपूजादिशिवकुंभपूजांतमितित्रिविक्रमः ॥ मंत्रान्त्संतर्प्यसंपूज्यवास्तु देवांश्चपूर्ववत् ॥ दिग्बलिंचबहिर्दत्त्वासमाचम्यस्वयंगुरुः ॥ ब्राह्मणान्भोजयित्वातुशंभुंविज्ञापयेत्ततः ॥ दुष्टलिंगमिदंशंभोशांतिरुद्धरणेस्य चेत् ॥ रुचिस्तवास्तेविधिनाअधितिष्ठचमांशिव ॥ एवंविज्ञाप्यदेवेशंशांतिहोमंसमाचरेत् ॥ मध्वाज्यक्षीरदूर्वाभिर्मूलेनाष्टाधिकंशतम् ॥ ततो

लिंगंचसंस्थाप्यपूजयेत्स्थंडिलेतथा॥लिंगंलिंगाधिष्ठितदेवतांस्थंडिलेसंस्थाप्येत्यर्थः॥ ॐव्यापकेश्वरायेतिनाम्नानेनशिवार्चनम्॥ ॐव्यापके
श्वरहृदयाय॰व्यापकेश्वरशिरसेनमः॥ॐव्यापकेश्वराशिखायैनमः—इत्याद्यूह्यम्।इत्यंगमंत्राः॥ततस्तत्राश्रितंमंत्रंवारयेदस्त्रबंधनः॥सत्वःकोपी
हयःकश्चिल्लिंगमाश्रित्यतिष्ठति॥लिंगंत्यक्त्वाशिवाज्ञाभियंत्रेष्टंतत्रगच्छतु॥विद्याविद्येश्वरैःशंभुःशंभुरत्रभविष्यति ॥ सहस्रंप्रतिभागंचततःपाशु
पताणुना ॥ हुत्वाशांत्यंबुनाप्रोक्ष्यततःस्पृष्ट्वाकुशैर्जपेत्॥ ब्रह्मशिलापिंडीलिंगात्मकदेवताभागत्रयसंस्कारार्थंपाशुपतास्त्रेणहुत्वाशांतिकलशो
दकेनदेवंसंप्रोक्ष्यकुशैश्चस्पृष्ट्वाहोमसंख्ययापाशुपतमंत्रंजपेत् ॥ दत्त्वार्घ्यंचविलोमेनतत्त्वतत्त्वाधिपांस्ततः ॥ मूर्तिमूर्तीश्वराँल्लिंगेपिंडिका
संस्थितान्गुरुः ॥ विसृज्यस्वर्णपाशेनवृषस्कंधस्थयातथा ॥ रज्ज्वाबद्धातथानीत्वाशैवमंत्रंगृणञ्छनैः ॥ तज्जलेनिःक्षिपेन्मंत्रीपुष्ट्यर्थंजु
हुयाच्छतम् ॥ तृप्तयेदिक्पतीनांचवास्तुशुद्ध्यैशतंशतम् । रक्षांविधायतद्धाम्निमहापाशुपतास्त्रतः ॥ लिंगमन्यत्ततस्तत्रस्थापयेद्विधिव
द्गुरुः ॥ विलोमेनपराङ्मुखसंज्ञकम् ॥ तत्त्वतत्त्वाधिपमूर्तिंमूर्तीश्वरावक्ष्यंते । सिद्धांतशेखरे ॥ जीर्णोद्धारविधिंवक्ष्येसमासात्तत्रचोदितम् ॥
॥ ईशान्यांदक्षिणेवापिमंडपंपश्चिमामुखम् ॥ कुर्वीतपूर्ववत्सर्वमेकास्यंचैकतोरणम् ॥ पूर्ववत्सर्वस्तंभादि ॥ द्वारपालार्चनंकुर्यात्स्थंडि
लेग्नौशिवार्चनम् ॥ द्वारपालार्चनंमंडपप्रतिष्ठाप्रकारेण ॥ मंत्राणांतर्पणंकुर्याद्वास्तुदेवार्चनंतथा ॥ मंत्राणां देवस्थापितकलानाम् ॥
अंतर्बहिर्बलिंदद्याच्छिवभक्तांश्चभोजयेत् ॥ शिवभक्तान्पंचेतित्रिविक्रमः ॥ द्विजान्कर्मकरादींश्चततोविज्ञापयेच्छिवम् ॥ दोषैर्लिंगमिदं
दुष्टंशांतिरस्त्वस्यचोद्धृतौ ॥ तस्मादेनंविधानेनह्यधितिष्ठमहेश्वर ॥ भवत्वितिवचस्तेनप्रोक्तंसंभावयेद्गुरुः ॥ तेनाशिवेनप्रोक्तंशांतिर्भव ॥ २२ ॥
त्वितिवचोगुरुर्भावयेत् ॥ विज्ञाप्यैवंशिवंभक्त्याशांतिहोमंसमाचरेत् ॥ मधुनाज्येनदुग्धेनदूर्वाभिर्मूलमंत्रतः ॥ शतमष्टाधिकंमंत्रंप्रत्येकंजुहुया

त्ततः ॥ मंत्रंमूलमंत्रमुच्चार्येत्यर्थः ॥ त्रिभिश्चमधुरैः सार्द्धंसमिधोघोरमंत्रतः ॥ शांत्यर्थंवर्तुलेकुंडेसहस्रंजुहुयाद्गुरुः ॥ अथवास्त्रेणजुहुया
द्व्याहृतीभिश्चपूर्णया ॥ बध्नीयात्कंकणं हैमंलिंगस्योत्तानकेकरे ॥ लिंगस्योत्तानंकरंभावयित्वातत्रहैमंकंकणंबध्नीयादित्यर्थः ॥ लिंगंसं
स्नाप्यसंपूज्यपूर्वोक्तविधिनाततः ॥ सांगंसंपूजयेद्भक्त्यास्थंडिलेव्यापकेश्वरम् ॥ लिंगाश्रितानिभूतानिताडयेदस्त्रमंत्रतः॥ यानिकानिचभूतानि
तिष्ठत्याश्रित्यलिंगकम् ॥ त्यक्त्वाशिवाज्ञयातानित्रजंतुस्थानमीप्सितम् ॥ विद्याविद्येश्वरैर्युक्तःशिवोलिंगेभविष्यति॥ इतिदत्त्वाशिवस्याज्ञांततो
भागत्रयेगुरुः॥हुत्वाहुत्वास्त्रमंत्रेणतथापाशुपतास्त्रतः ॥ प्रतिभागंसहस्रंचसिंचेच्छांतिघटोदकैः॥ ब्रह्मशिलापिंडीलिंगात्मकदेवभागत्रयंसंस्कर्तुं
त्रिसहस्रमंत्रेणहुत्वातेनैवप्रतिभागंकलशसहस्रेणाभिषिंचेदित्यर्थः॥मूलमध्याग्रकैर्दर्भैःस्पृष्ट्वाचजपमाचरेत्॥ ब्रह्मशिलांमूलेनपिंडीमध्येनलिंगम
ग्रेणदर्भैःस्पृष्ट्वेत्यर्थः ॥ प्राग्वत्पाशुपतास्त्रंचजपेहोमस्यसंख्यया ॥ सद्योजातादिवक्त्रेषुदद्यादर्घंपराङ्मुखम् ॥ दुष्टलिंगप्रतिपत्तिमाह ॥
सौधंभूमौपरित्याज्यंदारुजंचाग्निनादहेत् ॥ सौधंसुधानिर्मितंलिंगम् ॥ लोहजंतेनकार्यंस्याच्छैलजंचाप्सुनिःक्षिपेत् ॥ सुव
र्णाद्यष्टलोहनिर्मितंभग्नंचेत्तेनैवसुवर्णादिनातत्कार्यमित्यर्थः ॥ तत्त्वतत्त्वेश्वराँल्लिंगान्मूर्तिमूर्तीश्वरानपि ॥ तासामेवतत्रैवसंस्कार
संभवात् ॥ स्थलांतरनयनविधानाभावाच्च ॥ एतेनस्वस्थानादचलितस्याविकृतस्यचविद्युद्धतदग्धादेरप्येवमेवव्यवस्था ॥
स्थानाःच्चलितस्यतुपुनस्तत्रैवप्रतिष्ठा ॥ स्थानांतरविधानाभावाच्चलितस्यविकृतस्यचत्यागस्तादृशस्यान्यस्यप्रतिष्ठाच ॥ स्थूले
पूर्वपिंडीब्रह्मशिलायाअप्युद्धारः ॥ प्रतिपत्तिर्विधिनापिंडिकान्तरादिनिवेशश्च ॥ व्यंगेतुपूर्वपिंडिकादीनांभग्नत्वेएवमेव ॥ पिंडिकाद्यभावे
तुपिंडिकाद्यंतरस्थापनमात्रमित्यादिदुष्टलिंगानामित्यग्निपुराणवाक्याल्लिंगेपीठादिकेवापीतिसिद्धांतशेखरवाक्यात् ॥ पूर्वपीठंपरित्यज्येतिहय

शीर्षवाक्याच्च ॥ सुवर्णादिनिर्मितभंगादौतुतेनैवसुवर्णादिनाताहशंतावत्परिमाणंचलिंगादिकृत्वा तत्रैवपुनःस्थाप्यम् ॥ यदितेनसुवर्णादि
नाताहशंकर्तुंनशक्यतेतदासमुद्रेक्षिपेत् ॥ रत्नजातुसमुद्रएवक्षेप्तव्या ॥ रत्नजायदिदग्धापिस्वकांतिंनजहातितदासैवस्थाप्येतित्रिविक्रमः ।
लोहाद्यंछिन्नभिन्नांगमितिसिद्धांतशेखरवाक्यात् ॥ धातुजारत्नजावापीतिहयशीर्षवाक्यात् ॥ इतिजीर्णोद्धारविधिः ॥ अथास्यप्रयोगः ॥
यजमानउत्थायदक्षिणस्यामीशान्यांवा तज्जातीयद्रव्यनिर्मितंतन्मानंतदाकारंलिंगंताहशींप्रतिमांचस्थापयेत् ॥ अतिजीर्णमितिपूर्वो
क्ताद्धयशीर्षवाक्यात् ॥ पीठाच्चचालितंलिंगमिति त्यजेत्सदोषितंलिंगमिति बाहुपादशिरोहीनामिति यद्रव्यंयत्प्रमाणंचेतिच
सिद्धांतशेखरोक्तेः ॥ तस्मादेववाक्यनिचयात्प्रतिपत्तिप्रयोजकदोषाभावाच्चन्युब्जनिम्नविषयस्थादिङ्मूढानांचवैधचालनंतेषामेवपुनःस्थापनं
च ॥ भग्नचूर्णितयोस्तदवयवानांप्रतिपादनपूर्वकंनूतनानांस्थापनम् ॥ अनेकशकलत्वेनचूर्णितत्वेनचोद्धारपुनःस्थापनविध्योरप्रवृत्तेः ॥
चालितचलितपातितपतितमध्यस्थानांतुनोद्धारोनचत्यागः ॥ किंतुतेषामेवपुनःस्थापनम् ॥ उद्धृतस्योद्धारासंभवान्निर्दुष्टत्वेनप्रति
पत्तिविध्यप्रवृत्तेश्च ॥ एतेनैवनदीवेगापहृतोन्मत्तशत्रुचोरहस्त्याद्यपहृतानांलाभे तान्येवपुनःस्थाप्यानि ॥ तेषामलाभेतु
ताहशान्यन्यानिस्थाप्यानिनिषिद्धस्पर्शदूषितनिषिद्धजलस्पृष्टविप्रक्षतजदूषितपतिताद्यर्चितश्लेष्मविण्मूत्रादिदूषितानांस्वस्थानस्थितानामेव
पुनःसंस्कारोनोद्धरणंनापिप्रतिपत्तिः ॥ अतिजीर्णमितिपीठाच्चचालितमितित्यजेत्सदोषितंलिंगमितिपूर्वोक्ताद्वाक्यनिचयात्–लिंगस्थान्वि
सृजेन्मंत्रीपीठब्रह्मशिलागतान् ॥ वृषस्थान्विसृजेत्तद्वदंगमूर्तिस्थितानपि ॥ ततःसुवर्णपाशेनरज्ज्वागोचर्मजातया ॥ वृषस्कंधस्थयाव
द्धालिंगंपीठंचचर्मणा ॥ शिवमास्त्वितितद्वाह्येसजनोप्याहरेद्गुरुः । उद्धारार्थंचलिंगस्यतौवृषौप्रेरयेत्ततः ॥ बहिर्नीत्वाततोलिंगंपीठंब्रह्मशि

लांवृषम् ॥ रथादिकंसमारोप्यसमुद्रेनिःक्षिपेत्ततः ॥ स्थूललिंगोद्धृतौबद्धागजंवाप्रेषयेद्गुरुः ॥ सौधंभूमौपरित्यज्यदारुजंचानलेदहेत् ॥
सर्ववानिःक्षिपेत्तोयेलिंगंवाप्रतिमादिकम् ॥ ततःपाशुपतास्त्रेणशांत्यर्थंजुहुयाच्छतम् ॥ लोकपालाणुभिस्तद्वद्वास्तुशांत्यैशतंशतम् ॥ प्र
तिदैवतंशतंजुहुयादित्यर्थः ॥ रक्षांकुर्याच्चतद्धर्म्यैंमहापाशुपताणुना ॥ तन्मानंतन्मयंलिङ्गंतत्रसंस्थापयेत्पुनः ॥ प्रतिष्ठोक्तेनमार्गेणसर्वंकर्म
समाचरेत् ॥ हर्म्यस्यपरिवाराणांप्राकारादेःसमुद्धृतौ ॥ सर्वेषामपिजीर्णानामेषएवविधिःस्मृतः ॥ कर्तात्रदक्षिणांदद्याद्गुर्वादिभ्योयथोदिताम् ॥
यत्पुण्यंस्थापनेप्रोक्तंतत्फलंचैतदुद्धृतौ ॥ अयमत्रनिर्गलितोर्थः॥ लक्ष्मोज्झितस्फुटितविशीर्णश्वपचसेवितानांलिङ्गानांतादृशीनांवाहुपादशिरः
कर्णनासास्यहीनानांप्रतिमानांचविध्युक्तप्रकारेणचालनंजलादौप्रतिपादनंचकृत्वानूतनप्रकारेणतस्मिन्नेवस्थानेपूर्वपश्चिमद्वारैकतोरणंमंडपं
तन्मध्यभागेवेदिंपूर्वेभागेवर्तुलंचतुरस्रंवाकुंडंस्थंडिलंवापश्चिमेवास्तुपीठमुत्तरेवालुकयास्थंडिलंचकृत्वाकालादिस्मृत्वामौलफलाच्छतगुणफ
लकामोल्पप्रतिमायांदशगुणफलकामोवाजीर्णादिदोषदुष्टस्यलिंगस्यप्रतिमायावाउद्धारसमुच्छ्रयणंवाकरिष्यइतिसंकल्पयेत् ॥ पिंडिकावृष
गरुडप्रासादकलशेषुतुईश्वरप्रीतिकामइतिविशेषः ॥ सर्वत्रेश्वरप्रीतिकामौवा ॥ ततोगणेशपूजास्वस्तिवाचनमातृकापूजननांदीश्राद्धा
निनूतनप्रतिष्ठावत्कृत्वातद्वदेवब्रह्माचार्यसदस्यान्द्वात्रिंशत्षोडशाष्टौचतुरोवाऋत्विजोद्वारपालांश्चाष्टौचतुरोवावृत्वावस्त्रालंकारमधुपर्कादिभि
स्तान्पूजयेत् ॥ अथाचार्योमंडपपूजादिशिवकुंभपूजांतंकृत्वा वास्तुमंडलेमहावेद्यांचदेवतास्थापनंकृत्वा पीठादौप्रणवेनासनंदत्त्वा—
ॐव्यापकेश्वरएह्येहिनमः । ॐव्यापकेश्वरहृदयायनमः । ॐव्यापकेश्वरशिरसेस्वाहा । ॐव्यापकेश्वरशिखायैवषट् । ॐव्यापकेश्वरकवचा
यहुम् । ॐव्यापकेश्वरनेत्रत्रयायवौषट् ॐव्यापकेश्वरअस्त्रायफट् ॐइतिमंत्रैःशिवमर्चयेत् ॥ देवतांतरोद्धारेमूलमंत्रेणार्चयेत् ॥ ततो

ग्निसंस्थाप्यलिंगचालनार्थंमूलमंत्रेणतिलाहुतिसहस्रंहुत्त्वामंडलदेवताहोमंपूर्णाहुतिंचकृत्त्वा–जीर्णंभग्नमिदंदेवसर्वदोषावहंनृणाम् ॥ अस्यो
द्धारेकृतेशांतिःशास्त्रेऽस्मिन्कथितात्वया ॥ जीर्णोद्धारविधानंचनृपराष्ट्रहितावहम् ॥ तदत्राधिष्ठितान्देवप्रोद्धरामितवाज्ञयेति ॥ देवस्यजीर्ण
दोषंश्रावयित्वा शिल्पियुतःसांगंशिवंविसृज्य यजमानःसौवर्णकंकणंबद्ध्वा सौवर्णखनित्रेणोद्धृत्यरथमारोप्यतरुच्छायेपर्यंतदेशेवृक्षमूलेऽगाध
नदीह्रदेवावामदेवेनांगानिक्षिपेत् ॥ प्रतिमांतुप्रणवेनक्षिपेत् ॥ दारुजंचेत्तदुत्तरेदहेत् ॥ रत्नजंलिंगंयदिनिजकांतिमदेवभवतितदातदेव पूर्ववत्स्था
पयेत् ॥ सुवर्णादिमयंतदेवसाग्रंकृत्वास्थापयेत् ॥ प्रासादेत्वयंविशेषः–प्रासादमंत्रान्खड्गेछुरिकायांवासंयोज्यनूतनप्रासादसिद्धिपर्यंतंखड्गा
दिकमर्चयित्वाप्रासादेसिद्धेखड्गादिमंत्रान्यथास्थानंप्रतिष्ठाकालेन्यस्ययजमानमभिषिंचेत् ॥ ततोलिंगंप्रतिमांवातत्रैवविधिवत्संस्थाप्य
ध्रुवाद्यौरित्यादिमंत्रान्पठित्वास्थिरीकृत्यबहुसंपूज्यप्रार्थयेत् ॥ ज्ञानतोऽज्ञानतोवापियथोक्तंनकृतंयदि ॥ तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादान्महेश्वर ॥
कर्तूराज्ञःप्रजानांचशांतिर्भवतुसर्वदा ॥ अस्माकंशिल्पिनांचैवसुप्रीतोभवसर्वदेति ॥ चर्मण्वतीतरणिजाशुभसंगमस्यसान्निध्यभाजिकृतशा
लिनिमध्यदेशे ॥ ख्याताभरेहनगरीकिलतत्रराजाराजीवलोचनरतोभगवंतदेवः ॥ ॥ इतिश्रीसेंगरवंशावतंसश्रीमहाराजाधिराजभगवंतदेवादि
ष्टमीमांसकभट्टनीलकंठकृतेभगवंतभास्करेप्रतिष्ठामयूखोनवमःसमाप्तः ॥ ॥ ॥ ॥

इदं पुस्तकं मुम्बय्यां क्षेमराज श्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर"
(स्टीम्) मुद्रणाक्षरयन्त्रागारेऽङ्कयित्वा प्रकाशितम् । संवत् १९५९.